CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

संस्कृत-साहित्य-परिषद् ग्रन्थमालायाम्— ३६ संख्यक-ग्रन्थः

मन्दाक्रान्तावृत्तम्

(खण्डकाव्यम्)

काश्यपमहाकवि-महामहोपाध्याय-डिलिट्—
श्रीकालीपदतर्काचार्य्य—
प्रणीतम्

१३७८ वङ्गाब्दे
(१९७१ खृष्टाब्दे)

कलिकाता-संस्कृतसाहित्यपरिषदा
प्रकाशितम्

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सर्वस्वत्वं संरक्षितं सस्कृत-साहित्य-परिषदा

मूल्यम्—रूप्यकपञ्चकम्
सदस्यानां—रूप्यकचतुष्टयम्

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

संस्कृत-साहित्य-परिषद्ग्रन्थमालायां १६ संख्यकग्रन्थः

मन्दाक्रान्तावृत्तम्

खण्डकाव्यम्

काश्यपमहाकवि-महामहोपाध्याय-डि-लिट्-

श्रीकालीपदतर्काचार्य्य—

प्रणीतम्

प्रकाशकालः

१३७८ बङ्गाब्दे (१९७१ खृष्टाब्दे)

महालयादिवसः

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सर्वस्वत्वं संस्कृत-साहित्य-परिषदा
संरक्षितम्

१६८।१ राजा दीनेन्द्रष्ट्रीटस्थ-परिषदभवनात् श्रीश्यामापदभट्टाचार्य्य-
बि, ए काव्यतीर्थमहोदयेन मुद्रापितम् ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कविनिवेदनम्

अकाले स्वर्गमाप्तायाः पत्न्याः संस्मृतये चिरम् ।
राधालक्ष्मी—समाख्यायाः कृतं काव्यमिदं मया ॥१॥

यदि काव्यप्रियः कश्चित् काव्यमेतत् किलाल्पकम् ।
सकृत् पठेत् कृपायुक्तः कवेर्यत्नः फली तदा । २

प्रमादो मानुषो धर्मः स चेदत्र दृशं श्रयेत् ।
क्षन्तव्योऽसौ तदा सद्भिः क्षमाशीला हि साधवः । ३

काम्यभोगविहीना या सहसा त्रिदिवं गता ।
सा तत्स्मरणपूतेन काव्येनानेन मोदताम् । ४

यया परिषदा प्रीत्या काव्यमेतत् प्रकाशितम् ।
विज्ञापयति तामन्ते कविरेष कृतज्ञताम् । ५

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कविवंशादिशंसनम्

पूर्ववङ्गेषु कोटालिपारे पुरपुरन्दरे ।
काश्यपे कान्यकुब्जीये मिश्रवंशे श्रितोदयः । १

आसीत् पुरन्दराचार्य्योपाख्यो विप्रः प्रमोदनः ।
चन्द्रप्रतापभूपेन भूप्रदानेन वासितः । २

आचार्य्यचूड़ामणिरिद्धतेजाः,
श्रीनाथनामा प्रथमोऽस्य पुत्रः ।
कुलाभिमानी विदुषामधीशः,
सदा सदाचारपरः सुकीर्त्तिः । ३

द्वितीयो यादवानन्दो न्यायाचार्य्योपनामकः ।
सरस्वत्युपनामा च तृतीयो मधुसूदनः । ४

बाल्य एव स वैराग्याज् जहौ दण्डी गृहाश्रमम् ।
तस्मादद्वैतसिद्ध्याद्या नाना ग्रन्था जनिं ययुः । ५

वागीशश्चापरः पुत्रो जलमग्नो जहावसून् ।
श्रीनाथ-यादवानन्दकुले प्रापतुरायतिम् । ६

न्यायालङ्कारोपनामा लक्ष्मीदासो महामतिः ।
श्रीनाथस्य सुतस्तस्य रामनारायणः सुतः । ७

देवीरामः सुतस्तस्य कन्दर्पस्तत्सुतोऽभवत् ।
तस्य पुत्रो रमाकान्तो भिषजां यो गुरुर्महान् । ८

चण्डीप्रसादस्तत्पुत्रः सोऽप्यभूद् भिषजां गुरुः ।
तस्य पञ्चाभवन् पुत्रा विद्याचारपरायणाः । ९

आद्यो हरकुमाराख्यः सदाचारपरः परः ।
द्वितीयो द्वारिकानाथो मन्त्रतन्त्रादिकोविदः । १०

परो महिमचन्द्राख्यः शिरोमणिरिति श्रुतः ।
पुराणवक्ता वंशस्य गौरवाधायको महान् । ११

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

स्मार्त्तो विद्याभूषणाख्यसीताणाथः परः सुतः ।
विद्यादर्पेण शप्तश्च गोपालः पञ्चमो मृतः । १२

साधोर्हरकुमारस्य बभूव तनयद्वयम् ।
तत्राद्यो हरिदासाख्यः कृष्णदासाभिधोऽपरः । १३

पित्रा पोष्यतया दत्तः स भ्रात्रे तस्य याचञ्जया ।
तन्मातुरपि तद्भ्रातुर्विरोधे सत्यपि स्फुटे । १४

प्रथमो हरिदासोऽभूद् तर्कतीर्थोपनामकः ।
तर्केषु प्रतिभा यस्य विदुषां विस्मयावहा । १५

सुरम्या कविता तस्य कविचित्तप्रसादनी ।
शीलञ्च विमलं तातशीलतुल्यं यशस्करम् । १६

तस्य रामस्य सीतेव सीतासीत् सहधर्मिणी ।
युगधर्मः प्रभावेण मुक्तो यत्र पदे पदे । १७

तस्या दृष्ट्वा व्यतिक्रान्तमिवापत्योचितं वयः ।
हरिदासपिता साधुर्वंशलोपभयाकुलः । १८

स्वभावसिद्धया दैवश्रद्धयाविद्धमानसः ।
श्रीश्रीचण्डीशताबृत्तिपाठं विप्रैरकारयत् । १९

ततस्तस्यां समुत्पन्नाश्चत्वारस्तनयाः क्रमात् ।
वैधेन विधिना किं वा फलं साङ्ग न नाप्यते ? २०

आद्यः कालीपदस्तेषां ततो हरिहराभिधः ।
तृतीयो रामरतनश्चतुर्थः कार्त्तिकस्तथा । २१

काले पाश्चात्त्यविद्यायाः शिक्षणे पितुरिच्छया ।
प्रवृत्तोऽपि निवृत्तोऽभूदाद्यः कालीपदस्ततः । २२

सर्वः प्रयत्नो व्यर्थोऽभूत् पितुरिच्छाप्रपूरणे ।
नहि यत्नशतेनापि विधेरिच्छा प्रबाध्यते । २३

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पितुरिच्छानुसारेण परतस्तु परे त्रयः ।
पाश्चात्त्यविद्यां यत्नेनैवाशिक्षन्त यथाविधि । २४

अगत्या तातसम्मत्या ज्येष्ठः कालीपदाभिधः ।
संस्कृते रतिमापन्नः प्रारेभे तत् प्रशिक्षितुम् । २५

शब्दशास्त्रमधीत्यादौ स्वदेशे शैशवेऽशतः ।
कलिकातापुरं प्राप्य तत्पाठं स समापयत् । २६

पितृव्यकृष्णदासस्य सुगमादुपदेशतः ।
विशिष्टं संस्कृतज्ञानं तदैवात्र दधे पदम् । २७

ततः काव्यादिविद्यानां विशेषाधिगमेच्छया।
मूलाजोड़—महाविद्यालये स पठितुं गतः । २८

तत्र काव्यं पठन्नेव लब्धवान् स परं यशः ।
काव्यतीर्थपरीक्षायामप्याप्तः प्रथमं पदम् । २९

नलस्य वृत्तमालम्ब्य तदैव सुरभाषया ।
रचितं नाटकं तेन प्रयुक्तं तत्र बन्धुभिः । ३०

दृष्टास्तदा प्रभृत्येव नानापत्रप्रकाशिताः ।
गद्यपद्यनिबन्धाश्च तत्कृता देवभाषया । ३१

अथ गोतमसङ्काशात् सार्वभौमाद् गुरोश्चिरम् ।
महामहोपाध्यायाच्च शिवचन्द्रान्महामतेः । ३२

तर्कविद्यां समासाद्य प्रथमोऽभूत् परीक्षणे ।
महादैन्येऽपि नैवासौ सङ्कल्पाद् विच्युतोऽभवत् । ३३

परीक्षानियमादेष तर्कतीर्थपदं गतः ।
भूषितो गुरुणा स्नेहात् तर्काचार्य्येत्युपाधिना । ३४

काव्ये व्याकरणे तर्के तीर्थोपाधिषु सत्स्वपि ।
यमुपाधिं गुरुं मत्वा नाम्नि धत्ते तमेव सः । ३५

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अथ शिक्षासमाप्त्यैव समं दैवनियन्त्रणात् ।
नवे संस्कृतसाहित्यपरिषत् सुप्रतिष्ठिते । ३६

नानाशास्त्रमहाविद्यालयेऽध्यापकतां गतः ।
प्राध्यापयत् प्रयत्नेन बहुशिष्यानतन्द्रितः । ३७

तस्मिन्नवसरे ग्रन्था बहवस्तेन निर्मिताः ।
टीकारूपाः स्वतन्त्राश्च श्रित्वा साहित्यदर्शने । ३८

येषां कतिपयग्रन्थान् परिषत् संस्कृताश्रया ।
प्रीत्या प्रकाशयामास केचिच्चान्यप्रकाशिताः । ३९

साहित्यपरिषत्पत्रीसम्पादनविधौ हि सः ।
सह-सम्पादकः पूर्वं ततः सम्पादकोऽभवत् । ४०

विद्याकारणकैः कृत्यैः संस्तुतः स बुधैरथ ।
राजकीयमहाविद्यालयेऽध्यापकतामगात् । ४१

तत्राध्याप्य बहून् शिष्यानुत्कर्षेण महीयसा ।
ग्रन्थग्रन्थनकर्माद्यैर्यशो महदपि श्रितः । ४२

भारताधीश्वरेणाथ काले तोषमुपेयुषा ।
महामहोपाध्यायेति तस्मै मानपदं ददे । ४३

वङ्गप्रदेशस्य विभागहेतोः,
स्वदेशवासे सुचिराय लुप्ते ।
हुगलीप्रदेशस्थित—भद्रकाल्यां,
सबान्धवो वासमकल्पयत् सः । ४४

स्वाधीनभारतस्यापि तस्मै राष्ट्रपतिर्वरः ।
ददावाजीवनं भोग्यां ससम्मानां पुरस्कृतिम् । ४५

वर्द्धमानप्रदेशीयविश्वविद्यालयेन च ।
दत्तं तस्मै गुणप्रीत्या ससम्मानं 'डि-लिट्' पदम् । ४६

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

काशी—भारतधर्मादिमहामण्डलसंसदा ।
'विद्यावारिधि' नामास्मै वितीर्णं बहुपूर्वतः । ४७

श्रीशृङ्गेरिमठाधीश-शङ्कराचार्य्यसूरयः ।
तर्कालङ्कारनामास्मै तर्कविद्याप्रिया ददुः । ४८

सुवर्णपदकञ्चापि समहार्घपरिच्छदम् ।
दत्त्वा संसाधयाञ्चक्रुर्गौरवं तस्य पुष्कलम् । ४९

दत्तं संस्कृतसाहित्यसमाजेन प्रतुष्यता ।
'महाकवि' पदं तस्मै तत्कवित्वस्य गौरवात् । ५०

महाविद्यालयादेष गृहीत्वावसरं पुनः ।
महाचार्यविभागीयाध्यापने तत्र योजितः । ५१

मानोऽस्य भूयान् काशीस्थविश्वविद्यालयादिषु ।
कालीपदेन तेनैव खण्डकाव्यमिदं कृतम् । ५२

तस्य शास्त्रप्रियस्यापि काव्यमासीन्न न प्रियम् ।
येनावसरमाप्तवैव स काव्यं यत्नतो व्यधात् । ५३

क्रीड़ासु न समासक्तिस्तस्य बाल्येऽप्यदृश्यत ।
नाट्याभिनयकृत्ये तु बाल्यादेव रतिः परा । ५४

उत्तमा वक्तृताशक्तिरस्य कोविदतोषणी ।
यत्र नाट्यप्रयोगादिकृत्यमाप सहायताम् । ५५

युगधर्मानुसारेण तथैव पितुरिच्छया ।
पाश्चात्त्यविद्यां सम्प्राप्ता यद्यपि भ्रातरः कवेः । ५६

कार्त्तिकेन कनिष्ठेन तथापि कुलगौरवात् ।
गीर्वाणवाणीसेवायां परतः स्थापिता मतिः । ५७

अधीत्य काव्यशास्त्रञ्च संस्कृतज्ञानमर्जितम् ।
दाक्ष्यं संस्कृतनाट्यानां प्रयोगेष्वपि दर्शितम् । ५८

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

काले परिषदा सोऽसौ नाव्याचार्य्यपदे वृतः ।
संस्कृतस्य प्रभावोऽस्य, शीलेऽपि समलक्ष्यत । ५९

प्रिया संस्कृतसाहित्यपरिषत्तस्य सर्वथा ।
येन सर्वेषु कृत्येषु तस्याः स सचिवो महान् । ६०

भ्रातृणामन्यविद्यानां विद्यावैषम्यसम्भवम् ।
यत् कवेर्मानसं दुःखं तत् तेनैवापसारितम् । ६१

सुताः कविपितृव्यस्य सर्वे संस्कृतसेविनः ।
उपेन्द्रश्च नरेन्द्रश्च सुरेन्द्रश्चेति विश्रुताः । ६२

तत्रोपेन्द्रः काव्यसांख्यतीर्थो दार्शनिकः कविः ।
सदाचारपरो नित्यं शास्त्राध्यापनतत्परः । ६३

शास्त्युपाधिर्नरेन्द्राख्यः कश्चिद् विद्यालयं श्रितः ।
शिष्यान् संशिक्षयन्नेव गतोऽकाले सुरालयम् । ६४

काव्यपुराणतीर्थश्च सुरेन्द्रः शिक्षणव्रती ।
कृती पाश्चात्यविद्यायामपि विद्यालये स्थितः । ६५

कवेर्गङ्गेशसोमेशौ सुतावध्यापनाव्रतौ ।
कार्त्तिकस्य सुतौ तद्वद् वीरेश-शङ्करावपि ॥ ६६

कवेर्जीवनवृत्तान्तं ये जानन्ति सुमेधसः ।
काव्येनानेन तच्चित्तो तदंशः स्मृतिमेष्यति । ६७

मया सुविदितं यद्यत् कवेर्वृत्तं विशेषतः ।
तत्तद् वृत्तं समासेन यथाज्ञानं निवेदितम् । ६८

कस्यचित् कविबान्धवस्य

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्रकृतकाव्य-वस्तुसंक्षेपः ।

पूर्ववङ्गप्रदेशीये कोट्टलाख्ये महापुरे ।
विप्रदासाभिधः कश्चिदासीद् सद्वृत्तभूसुरः । १

विद्याचारादिसम्पन्नो विष्णुदासस्तदात्मजः ।
तस्याभूद् विष्णुदासस्य सुतो देवसुतोपमः । २

श्यामादासेति नामास्य प्रचकार पितामहः ।
यतश्चन्डीशतावृत्तिपाठात्तस्याभवज्जनिः । ३

तस्य प्रथमशिक्षायां समाप्तायां स्वके गृहे ।
विशिष्टविद्यालाभार्थं दूरदेशे स वासितः । ४

सुयोग्यस्य गुरोस्तत्र सन्निधौ सुचिरं वसन् ।
नाना विद्यासु यत्नेन स ज्ञानं सम्प्रपेदिवान् । ५

समाप्ते तत्र तस्याथ विद्याग्रहणकर्मणि ।
उपयेमे गुरोः कन्यां तेनासौ दृढमर्थितः । ६

पूर्वं गुरुसुतामेतामतिस्नेहेक्षितामपि ।
विवाहात् परतः कृष्णां प्रीत्या नासौ गृहीतवान् । ७

असौ पतिगृहं प्राप्य राधाख्या सर्ववान्धवान् ।
प्रीणयित्वापि शीलाद्यैः पत्युः प्रीतेर्बहिः स्थिता । ८

राधादर्शनमप्यस्य बभूव दृढमप्रियम् ।
पितुर्विद्यालयं यस्मात् स्वाश्रयं स सदा व्यधात् । ९

क्रमेण प्राप्तया वृद्धिं पत्युरात्मन्यवज्ञया ।
व्यर्थं सा जीवनं मत्वा निद्राहारादिकं जहौ । १०

जीवने निर्व्यपेक्षासौ निद्राहारादिवर्जनात् ।
आक्रान्ताजनि रोगेण गुरुणा राजयक्ष्मणा । ११

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

क्रमेण ववृधे रोगश्चिकित्सा व्यर्थतामगात् ।
परिवृत्तिं तदा प्राप श्यामादासस्य मानसम् । १२

राधाया रोगशय्यायामुपविष्टः कदाचन ।
क्षमां सम्प्रार्थयाञ्चक्रे नाना कोमलभाषितैः । १३

राधया याचितोऽप्यन्ते प्राह प्रस्खलिताक्षरम् ।
स्वप्नेऽपि मे प्रिया नान्या भविता यदि ते मृतिः । १४

तेनासाध्येन रोगेण साऽचिरेण जहावसून् ।
शोके निमज्ज्य निःशेषान् शीलाद्याकृष्टवान्धवान् । १५

ततो वैधविधानान्ते पुनर्दारपरिग्रहे ।
श्यामादासप्रवृत्त्यर्थं यत्नं चक्रे पितामहः । १६

अचिरेण गृहं त्यक्त्वा तेनात्मा रक्षितस्ततः ।
क्रमेण च नवद्वीपं गत्वा तत्र कृतस्थितिः । १७

शिष्याध्यापनकृत्याद्यैः प्रपेदे सुमहद् यशः ।
राधेति चाजपन्नित्यं मन्त्रवज्जाह्नवीतटे । १८

अथ वीतेषु वर्षेषु स्वास्थ्यमाध्यस्थ्यहेतुना ।
रोगाक्रान्तो जहौ प्राणान् पुण्ये भागीरथीतटे । १९

पूर्वं प्राणपरित्यागादाह शिष्यान् स सादरम् ।
राधाश्मशाने दाह्योहं पूर्ववङ्गेषु कोट्टले । २०

पितुर्मे विष्णुदासस्य प्रसिद्धभवनान्तिके ।
राधाश्मशानं सम्प्राप्यं सेयं वो गुरुदक्षिणा । २१

शिष्यास्तदनुसारेण भक्त्या तद्देहवाहिनः ।
राधाश्मशाने तद्देहदाहं चक्रुर्यथाविधि । २२

तत्रातिश्रद्धया पौरैः कृतं मन्दिरमुत्तमम् ।
'दम्पतिप्रेमतीर्थं' तन्नाम्ना सुप्रथितं भुवि । २३

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

मन्दाक्रान्ता-वृत्तम्

(खण्ड-काव्यम्)

प्रथमविलासः

[मन्देन शनिना आक्रान्ताया वृत्तं वृत्तान्तः, अथ च मन्दाक्रान्ता वृत्तं छन्दः, तदधिकृत्य कृतमिति प्रकृतनामार्थनिरुक्तिः ।]

वङ्गप्रान्ते बहुलविदितं पत्तनं कोट्टलाख्यं,
मुख्या यस्मिन् कृतवसतयो ब्राह्मणा लक्षसंख्याः ।
सर्वे मुग्धा इव गुणगुणा यत्र नित्यं वसन्तो,
देशैः काम्यं त्रिदशनगरीसाम्यमुद्भासयन्ति ॥१॥

श्रद्धाविद्धा निखिलजनता यत्र देवद्विजेषु,
क्षेमं वैधं रचयति विधिं नो भ्रमेणाप्यवैधम् ।
दूरे भीताऽपसरति यतः पापचिन्ता दुरन्ता,
शक्तः शौर्यं प्रथयितुमभून्नो कलिर्यत्र कालः ॥२॥

तत्र प्रातः प्रभृति मनुजा नित्यकृत्येषु लग्नाः,
पङ्के मग्ना भवितुमभितो भेजिरे नावकाशम् ।
नालं भूत्वा यदधिकृतये पापराशिर्निराशः,
क्षोभाद् भेजे कविकुलमतं स्वाश्रितं कृष्णिमानम् ॥३॥

न्यूनाधिक्यं नहि जनगणे यत्र वैधे विधाने,
स्वे स्वे कृत्ये प्रतिजनगता सञ्जिगीषा परेषाम् ।
नो साफल्यं समधिकुरुते तुल्यभावात् समेषां,
तुल्यादृष्टैर्विहितजनुषो नूनमेतत् पुरस्थाः ॥४॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

यत्र प्रीत्या मनुजनिवहैः सेव्यमानस्त्रिवर्गो,
व्याघातं नो घटयति मिथस्तुल्यमेवैधमानः ।
भुक्त्वा प्रौढे वयसि विषयान् वार्द्धके यत्र वृद्धाः,
पुत्राद्येषु न्यदधत गुरुस्वीयसंसारभारम् ॥५॥

बाल्ये विद्याभ्यसनमकृशं यौवने वित्तचिन्ता,
वृद्धावस्थामुपगतवतां यत्र धर्मार्थमीहा ।
संस्कारार्थं मलिनमनसो यत्र कृत्यं सकामं,
पूते चित्ते तदनु परमब्रह्मलग्नः समाधिः ॥६॥

विद्यावादाद् बहिरनुदितो यत्र कश्चिद् विवादः,
स्वादो भक्ष्यान्नहि परिचितोऽन्यस्य कस्यापि यस्मिन् ।
प्रातः सायं क्षितिसुरसुतैर्यत्र संस्कारवन्तो,
गीताः पूता विदधति दिशः पावनाः श्रौतमन्त्राः ॥७॥

प्रायो लक्षं क्षितिसुरवराः शैवलिङ्गानि यस्मिन् ,
धुस्तूराद्यैः कुसुमनिवहैर्बिल्वपत्रैस्तथान्यैः ।
शम्भुप्रीत्यै सदुपकरणैः प्रत्यहं पूजयित्वा,
विद्यामिद्धां निखिलजयिनीमाशुतोषाल्लभन्ते ॥८॥

वापीनीरोपरि परिगतं बिल्वपत्रं प्रसूनं,
दूर्वा यस्मिन्नपि पशुपतेः पूजनं व्यञ्जयन्ति ।
पित्र्यं दैवं विहितमुचितं तर्पणं यत्र चार्षं,
पित्रादीनां जनयतितरां तृप्तिमुद्यत्तृषाणाम् ॥९॥

शाक्ताः शैवा विमलमतयो वैष्णवा गाणपत्याः,
सौरा देवान्तररतिभृतो मानवा वा स्वभावात् ।
यत्रान्योन्यं हृदि विजहतो द्वेषलेशं प्रसन्नाः,
स्व-स्वाभीष्टं परमशुभदं देवमाराधयन्ते ॥१०॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

गेहे गेहे गृहपतिगणाः प्राप्तमैत्रीप्रसादा,
यत्रापूर्वं सुखमुपगताः पुण्यशीला लसन्ति ।
दिव्यं भोगं त्रिदिवविभवं वापि न प्रार्थयन्ते,
मैत्रीपूता स्थितिरतितरामुत्तमा स्वर्गराज्यात् ॥११॥

दुःखं कश्चिद् व्रजति न परं प्रेक्ष्य सौभाग्यवन्तं,
सन्तोऽपृष्टा अपि परहितं व्याहरन्त्यप्रमादम् ।
यत्र प्राप्ते क्वचिदपि महे तत्पुरस्था गृहस्थाः,
कृत्यं सर्वं स्वकमिव समुत्साहतः साधयन्ति ॥१२॥

दाने शूरा धनिकनिकरा यत्र दैन्यावसन्ने,
नावज्ञाया लवमपि दधत्यात्मवित्ताभिमानात् ।
संप्राप्तायां विपदि धनिका दैन्यभाजां जनानां,
साहाय्यार्थं ददति विभवं मेघवर्षानुकारम् ॥१३॥

यस्मिन्नासञ्छतमतिथयोऽप्येकदा धर्मबुद्ध्या,
श्रद्धादत्तैः सदुपकरणैरर्चिता देवतावत् ।
कृत्वा प्रीत्या गृहपतिगणाः स्वस्तियोग्यं नृयज्ञं,
धर्मैर्धन्या धवलयशसा भूषितैः सर्वकालम् ॥१४॥

प्रीता यस्मिन्नतिथिनिवहाः प्रीतिपूर्णैर्वचोभिः,
पक्वैरामैरपि सुमधुरैर्भोज्यपेयैरनेकैः ।
आशीर्वादं शुभमभिददुः सत्कृताः सद्गृहस्थैः,
पूजाप्रीताः प्रददति वरं देवता नात्र चित्रम् ॥१५॥

मातापित्रोश्चरणकमलान्यर्चयित्वा प्रभाते,
भूयो भव्यं तनयनिचयो यत्र नित्यं चिनोति ।
प्रीतिं संसाधयितुमनयोः किं न कर्त्तुं स ईष्टे ?
तत्सम्प्रीतिर्जनयति मुदं सर्ववृन्दारकाणाम् ॥१६॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पित्रोराज्ञां शिरसि निदधद् यत्र पुत्रप्रतानः,
क्लेशं सर्वं गणयति लघुं तां फलाढ्यां विधातुम् ।
रामं कीर्त्या समभिभवितुं यत्नसीमां दधाति,
प्रत्यक्षौ ताविति च मनुते तत्र देवाद् विशेषम् ॥१७॥

यत्राकाशोरसि परिसृतैः शङ्ख-घण्टादिवाद्यैः,
सुप्तिं देवा जहति मिलितैः प्रातरुत्थानमन्त्रैः ।
नित्यप्राभातिकशिवमयारात्रिकोद्गीर्णधूमै-,
र्दीपालोकैरपि तदुचितैः पीड़िताक्षा भवन्ति ॥१८॥

सेव्यो देवो निजतुलनयेत्येव यस्मिन्निदाघे,
शालग्रामोपरि सुमनसो वारिधारां सृजन्ति ।
शालग्रामं शिशिरसमये स्नापयित्वाल्पमल्पम् ,
जाड्यं हन्तुं रविकरमये क्वापि संस्थापयन्ति ॥१९॥

पर्वाहेषु प्रमुदितहृदो यत्र भक्तप्रवीणा-,
स्तत्तद्देवार्च्चनमनलसाः शक्तिवत् साधयन्ति ।
पैत्रे दैवेऽपि न विधिमते लेशतः सावहेलाः,
सन्तो देवानपि पितृगणानादरात् पूजयन्ति ॥२०॥

एको विष्णुः पृथगभिधया श्रीधरः कृष्णचन्द्रः,
ख्यातो रूपैरपि बहुविधैर्यत्र गोविन्ददेवः ।
शालग्रामो दधिपरगतो वामनश्चानुभावी,
तत्तत्पूजां विदधति पृथक् सादरं भिन्नवंश्याः ॥२१॥

चण्डी यत्र प्रचितकरुणा पूजिता सिद्धमुख्यैः,
क्षेमं दत्ते भृशमुपगता पञ्चमुण्डीप्रतिष्ठाम् ।
नैका मूर्त्तीरधिकृतवती नैकदेशेषु दृश्या,
तत्तद्देशे समनुभवितुं भक्तसङ्घस्य पूजाम् ॥२२॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

काले काले भवति सुमहानुत्सवस्तत्र तत्र,
प्रोत्साहेन द्रविणनिकरैर्भक्तवृन्दैर्वितीर्णैः ।
यस्मिन् नानाजनपदजना भक्तिमन्तः समेताः,
सिन्धूच्छ्वासा इव हृदि मुदं पश्यतां वर्त्तयन्ति ॥२३॥

कश्चिद् भक्त्या शिरसि कुरुते देवनिर्माल्यपुष्पं,
कश्चिद् भूमौ प्रणमति शिरो न्यस्य मन्त्रं पठित्वा ।
कश्चिद् भक्त्या पिबति शुभदं देवतास्नाननीरं,
कश्चिद् भुङ्क्ते शिवमुपगतं देवतोत्सृष्टमन्नम् ॥२४॥

उच्चैः केचिज्जयजय-रवं कुर्वते भक्तिपूर्वं,
केचित् क्षीरं प्रददति फलं शर्कराखण्डमन्ये ।
केचित् पुष्पाण्यथ तुलसिका विल्वपत्राणि केचिद्,
देवालिन्दे तिलमितमपि स्थानमाप्यं न रिक्तम् ॥२५॥

उच्चैर्मन्त्रान् पठति विदधद्देवतार्चां पुरोधाः,
काले चारात्रिकमपि जनाह्लादनं संविधत्ते ।
उद्यद्घण्टा-पटहमुरली-कांस्य-शङ्खादिनादै-,
र्नत्वा देवं कुशलमखिलं याचते स्तोत्रमन्त्रैः ॥२६॥

पूजाकृत्ये समुचितमिहासाद्यते वस्तु सर्वं,
शास्त्रे यद् यद् विहितमभवत् कस्यचिन्नानुकल्पः ।
मन्त्रे शुद्धिः क्रमसमुदयः कर्मणामव्यपेतो,
यद्यद्योगाद् भवति परमापूर्वसृष्टिः क्रियाभ्यः ॥२७॥

आद्या विद्या भवति मनुजैः पूजिता यत्र सद्भि-,
र्योग्यारम्भैर्वलिभिरतुलैः पञ्चमुण्डीनिरूढा ।
यस्मिन् लोकाः प्रियकविपदै रम्यसङ्गीतबन्धै-,
स्त्यक्ताहाराः स्वपनरहिताः क्षौद्रधारां पिबन्ति ॥२८॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

दूराद् दूरान्मनुजनिकरास्तस्य गीतस्य रागात् ,
तत्रायाता दिवसरजनीज्ञानहीना भवन्तः ।
वैरात् पक्षद्वयविरचितं काव्यमास्वादयन्तः,
सर्वां दूरागमनजनितां दुर्गतिं विस्मरन्ति ॥२९॥

स्त्रीणां पक्षद्वयभृतिजुषां दिव्यपीयूषतुल्यं,
प्राणारामं मधुर-मधुरं गीतमास्वादयन्तः ।
ध्यायन्तीत्थं किमु वयमहो स्वर्गवाराङ्गनानां,
भाग्याद् गीतामृतमुपनतं काम्यमास्वादयामः ॥३०॥

केचिद् गीतामृतमधुरिमास्वादसंमुग्धचित्ता-,
स्तारुण्येन प्रचितवपुषां योषितां रूपकृष्टाः ।
दष्टाः संकल्पजविषधरेणान्तरालं श्रयन्त-,
स्ताभिः सौम्यप्रणयवचनं सादरं कल्पयन्ति ॥३१॥

गीतं यावत् सुमधुरमहो जायतां तत्र पुंसाम् ,
औदासीन्यं श्रयति जनता तत्र जात्या विरक्ताः ।
दृष्ट्वा भावं तमिममसमं गीतिदक्षाः पुमांसो,
नारीभावं कुरु परभवे देवमित्यर्थयन्ते ॥३२॥

देवीपूजाङ्गनपरिसरः सोत्सवे तत्र काले,
स्रोतःसृग्रैरज-महिषयोर्मेषकाणाञ्च रक्तैः ।
पङ्काकीर्णः प्रपतनभयान्मानवानामगम्यः,
केचिद् भक्ताः शिरसि तिलकं कुर्वते प्रान्तभागात् ॥३३॥

दृष्ट्वा रक्तं जलदसमयस्याम्बुवत् सम्प्रसृतं,
केचिन्मत्ता इव परिसरे तत्र गाढं लुठन्तः ।
रक्ताक्ताङ्गा विकटवपुषः प्रेतवत् सम्प्रतीता,
बालादीनां भयमतितरां मानसे भावयन्ति ॥३४

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीश्रीचण्डीस्तुतिशतभृतः पाठतः सप्तशत्या-,
स्तस्मिन् पूजोत्सवसुदिवसे शून्यमार्गे पवित्रे ।
नूनं देवा मुनिपरिवृताः सिद्ध-साध्याश्च सर्वे,
श्रोतुं देव्याः स्तुतिमुखकथाः सङ्घशः सम्पतन्ति ॥३५॥

वामे देवी निजकरयुगे भीमखड्गं नृमुण्डं,
धृत्वा दक्षेऽपि च करयुगे शं वराभीतियुग्मम् ।
एकैवासो शिवमथ महारौद्रमादाय रूपं,
दुष्टध्वंसं गमयति निजं शिष्टभव्यञ्च कृत्यम् ॥३६॥

ब्रह्मध्यानादुदयति नृणां भोगहीनोऽपवर्गो,
देवी ध्याता वितरति समं भुक्तिमुक्ती प्रसन्ना ।
तस्मान् मुक्त्वा शिवमपि परब्रह्म सर्वार्थसिद्ध्यै,
युग्मप्रीत्या गिरिशदयितां यत्र भक्ताः श्रयन्ते ॥३७॥

संख्यातीता निशितमतयो यत्र धीराः स्वगेहे,
दत्त्वाहारं वसतिमपि चासंख्यशिष्योत्तमेभ्यः ।
विद्यादानान्नियतमनयन् वृद्धिमात्मीयविद्यां,
विद्यावित्ते द्रविणनिकरादेष भेदोऽपरस्मात् ॥३८॥

यत्र श्रुत्वाभ्यसननिरतच्छात्रसन्दर्भपाठं,
सव्यत्यासं नयति तमिमं शुद्धिमत्यन्तबालः ।
लज्जानम्रः पठति च पुनः सोऽनुदात्तस्वरेण,
किं नामेदं विदितमपरेणेति पार्श्वाणि पश्यन् ॥३९॥

न स्वल्पोऽपि प्रलयमयते कर्मणान्येन काल-,
स्त्यक्त्वा शास्त्रा यमननं शिष्यविद्यादिदानम् ।
औदासीन्यं दधति नियतं गेहकृत्यप्रपञ्चे,
नापेक्षन्ते विषयमपरं ज्ञानपीयूषमत्ताः ॥४०॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

शिष्यः पुत्रादपि गुरुतरस्नेहभाग् यत्र काम्यो,
विद्यामानादपरमधिकं मन्यते नो विपश्चित् ।
शास्त्रार्थेषु क्वचिदपि यदा संशयो जागरूकः,
सुप्तिं हित्वाशनमपि तदा चेष्टते तं निहन्तुम् ॥४१॥

पातुं पुष्पान्मधु मधुकरा यद्वदायान्ति दूरात्,
तद्वद् विद्यारसिकनिकरा यत्र दिग्भ्यः पतन्ति ।
तोयं वर्षाजलमुच इव त्यक्तकार्पण्यलेशं,
धीरा विद्या ददति नियतं तेभ्य आगन्तुकेभ्यः ॥४२॥

विद्यागेहे क्वचिदुपगते भिन्नविद्यालयस्य
छात्रे जेतुं तमतियतते यत्र विद्यार्थिसङ्घः ।
तेनात्यर्थं मनसि गुरवो गौरवं धारयन्ते,
शिष्याणां यो विजयगरिमा सोऽयमास्ते गुरूणाम् ॥४३॥

यत्र च्छात्रानहनि भृशमध्याप्य तर्कादिशास्त्रं,
रात्रौ भूयो विदधति बुधास्तद्गतां शिष्यशिक्षाम् ।
प्रज्ञा यावन्नहि समुदिताध्येयतत्त्वे समग्रा,
तावद् द्विस्त्रिस्तदतिगहनं शास्त्रतत्त्वं निवेद्यम् ॥४४॥

यस्मिन् दीना अपि बुधगणा वत्सरस्यार्द्धभागं,
भिक्षावृत्त्यापरजनपदाद् द्रव्यमासादयन्तः ।
छात्राहारप्रभृतिविषयान् साधयन्ते कथञ्चित् ,
विद्याप्रीतिः खलु विजयिनी सर्वदुःखापहन्त्री ॥४५॥

यस्मिंश्चित्रा परिणयसभा वैदिकब्राह्मणानां,
देवी वाणी प्रवहति यतः पूतगङ्गापयोवत् ।
कन्यापक्षो वरपरिषदं जेतुकामः सगर्वं,
प्रश्नं ब्रूते वरपरिषदा साध्यते तत्समाधिः ॥४६॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

यस्मिन् कस्मिन्नपि च सुमहत्युत्सवे सम्प्रपन्ने,
सम्मानार्थं परजनपदावासिनां पण्डितानाम्।
आहूतानां विजयविधये सुप्रबन्धो बुधानां,
विद्यावित्ते विपुलविपुलं गौरवं सम्प्रसूते ॥४३॥

यस्मिन् दासा अपि मतिमतां गौरवेण प्रभूणाम्,
अग्रे दासान्तरपरिषदो गर्वमुद्भासयन्ति।
नाल्पस्तापस्तपनकिरणोत्तापितप्रस्तराणां,
राज्ञस्तेजो जनयति किलामात्यतेजो जगत्याम् ॥४८॥

दुर्गादेव्याः शरदि शिवदा यादृशी तत्र पूजा,
बह्वारम्भा भवति सुचिरात् सा वसन्तेऽपि तद्वत्।
एकां सन्ध्यामहनि कुरुते भोजनं यो दरिद्रो,
देव्याः सोऽपि प्रणयति महापूजनं तत्र काले ॥४९॥

प्रत्यासन्ने गिरिपतिसुतापूजनाहे पवित्रे,
तस्मिन् गेहं किमपि न बभौ तत्सुमूर्त्या विहीनम्।
सर्वत्रैव प्रसृतिमगमत् तत्कुलालस्य चिन्ता,
मातुर्मूर्तिः कथमिव समाधीयतां चारुरूपा ॥५०॥

स्पर्द्धापूर्वं निखिलजननीमूर्त्तिनिर्माणयत्नात्,
सर्वत्रास्त प्रतिकृतिरतीवोत्तमा निर्विशेषम्।
या या दृष्टा जनपदजनैर्मण्डपे मातृमूर्त्तिः,
शिल्पोत्कर्षात् समसुनिपुणास्तत्कुलालाः प्रतीताः ॥५१॥

तस्मिन्नेकः पटहनिनदस्तीक्ष्णतीक्ष्णोऽन्तरीक्षे,
वायुं श्रित्वाजनि सुतुमुलः शङ्खघण्टादिनादैः।
निर्विच्छेदं समयमखिलं प्रातरारभ्य रात्रिं,
यावन्नादप्रतिरवशतं व्यानशे दिग्दिगन्तान् ॥५२॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

गीतं क्वापि क्वचिदभिनयो रूपकाणां वराणां,
नृत्योल्लासः क्वचन सुखदः कौतुकश्चान्यरूपम् ।
तस्मिन् काले सममुपनतं तत्र मोदाय सर्वम् ,
सर्वान् लोकान् सुखजलनिधौ मज्जयामास गाढम् ॥५३॥

गीताद् वाद्याज्जनकलकलात् स्तोत्रमन्त्रादिपाठाद् ,
वीचिस्तोमादिव जनगणात्तत्र देवीं दिदृक्षोः ।
शोभाधानाद् भवनवपुषां ज्ञातिमित्रादिसङ्गाद् ,
दुःखं भीत्याभजत किमहो तत्पुराद् दूरदेशम् ॥५४॥

वर्षे वर्षे सुविपुलमहश्चैत्रसंक्रान्तिमूलः,
स्थाने स्थाने समुदयते यत्र चित्रः स्वतन्त्रः ।
जात्या नीचा अपि नरगणास्तत्र नार्यश्च काश्चिद् ,
आलम्बन्ते यतिजनगणाचारदीक्षां सुभक्त्या ॥५५॥

आस्ये तेषां 'जय जय महादेव'-रावोऽत्युदात्तः,
सर्वत्राङ्गे गहननिचितः पुण्यगन्धप्रलेपः ।
कण्ठे हस्तेऽपि च परिहिता स्थूलरुद्राक्षमाला,
वासः सौम्यं यतिसमुचितं गैरिकाभ्यक्तरक्तम् ॥५ ॥

भित्त्वा जिह्वां भजति गिरिशं कोऽप्ययःसायकेन,
पार्श्वं भित्त्वा रचयति रसात् सूत्रनृत्यञ्च कश्चित् ।
पृष्ठं भित्त्वा वड़िशमयसस्तत्र कश्चित् प्रवेश्य,
रज्ज्वा बद्धो वियति परितो घूर्णते स्तम्भशीर्षे ॥५७॥

हस्ते तस्य भ्रमति परितो हृष्यतो वेत्रगुच्छो,
वेगेनातः परमपि च मां घूर्णयेत्यानने वाक् ।
हस्तोत्क्षेपश्चरणयुगलोत्क्षेपणञ्चापि तीक्ष्णं,
शैवी भक्तिर्वितरति परां शक्तिमेभ्यो विचित्राम् ॥५८॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कश्चिद् भक्तः पतति निशिते खड्गशूलादिकान्ते,
देहे शम्भोरमितकृपया नो क्षतिः कापि तस्य ।
पट्टस्याधः क्षरितसलिलस्नातदेहा निशान्ते,
बन्ध्याप्याशु प्रभवतितरां सूतये सत्सुतानाम् ॥५९॥

नानाच्छन्दोमयसुरवचः-प्राकृतस्तोत्रपद्यै-,
धूपाद् धूमः प्रसरति यदा दारुपट्टाग्रभागे ।
नृत्यारम्भो भवति हि तदा दृश्यमानो जनौघै-,
र्देवेनाधिष्ठितमपि जडं वस्तु चैतन्यमेति ॥६०॥

किञ्चित्कालात् परमपि भृशं स्पन्दितो दारुपट्टः,
सिन्दूराक्तं गमयति मुहुः शीर्षमूर्ध्वं तथाधः ।
अग्रे गन्तुं रयमुपगतः सोऽथ शैवप्रभावा-,
न्नालं सोढुं तमुदितरयं मस्तके पट्टधारी ॥६१॥

शीर्षे कृत्वा तमथ रयिणं सञ्चलद्दारुपट्टं,
शम्भोः पूजागृहमभि भृशं धावति क्षीवतुल्यः ।
गत्वा गत्वा गिरिशसदनप्राङ्गणं सम्प्रपन्नः,
सोऽयं भूमौ पतति सहसा मूर्च्छितः पट्टधारी ॥६२॥

मूर्च्छां तस्य व्यपगमयितुं मूर्ध्नि नेत्रे ललाटे,
नैके लोका विदधति परं नीर-वातोपचारम् ।
वीते काले कियति च नृणां यत्नसिद्धोपचारात्,
संज्ञां सोऽयं सपदि लभते मोदभूत्यै जनानाम् ॥६३॥

तस्मिन् शैवोत्सवसमुदये वस्तुजालैर्विचित्रा,
संख्यातीतैर्जनरतिकरैर्जायमाना निषद्या ।
बालान् वृद्धानपि युवगणान् कर्षति प्रीतिदानाद्,
दूरश्रव्या जनकलकलैः क्रीडनाद्यैश्च हृद्या ॥६४॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वंशीरन्ध्रं वदनमरुता पूरयन् कोऽपि बालो,
बालानन्यानिह मुरलिकाः क्रेतुकामान् करोति ।
क्रीडावस्तुक्रयविधिरतान् वीक्ष्य बाला दरिद्रा,
दसौत्सुक्याः स्वजननिवहं तत्क्रयायार्थयन्ते ॥६५॥

दृष्ट्वा हृष्टं धनिकतनयं स्वेप्सितं क्रीतवन्तं,
दीनो बालः सजलनयनो याचते मातरं स्वाम् ।
दीना वस्तुक्रयसमुचितद्रव्यदानासमर्था,
दुःखेनाहो रचयति सुतं स्वाश्रुभिः क्लिन्नकायम् ॥६६।

दोलारूढाः क्वचन शिशवः कौतुकायत्तचित्ता,
ऊर्ध्वंश्वाधो विदधति गतिं लोकभाग्यानुकारम् ।
नानादृश्यं जनधनहरं केऽपि सन्दर्शयन्तः,
कर्षन्त्यन्तः पटमयगृहस्यातिकौतूहलाढ्यान् ॥६७॥

क्रीणन्त्येकाः किल युवतयो भूषणं काचसृष्टं,
काश्चित् स्वर्णद्युति सुघटितं भूषणाश्चारकूटम् ।
शृङ्गाज्जातं रजतजनितं दन्तिदन्तादिसूतं,
काश्चिच्चान्या, निजनिजदशा काममेदे निदानम् ॥६८॥

नानाकारप्रतिकृतिकुलं पार्थिवं तैजसं वा,
काचं दारुप्रभवमपि वा दन्तिदन्तादिजातम् ।
संविक्रेतुं विपणिनिचयस्तत्र सन्निष्ठमानो,
विश्वाकारं गमयति किमेकत्र तत्रोपयातान् ॥६९॥

विन्दत्यस्ताचलमथ रवो स्वस्वगेहं यियासु-,
र्लोकश्रेणी स्वकमभिमतं वस्तु हस्ते दधाना ।
मार्गं याता जलरयसमा व्यक्तकोलाहलत्वाद्,
दूरस्थानामपि पिशुनयत्यापणस्यावसानम् ॥७०॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

यस्मिन्नल्पायत-नदवरो घर्घरो वाति नित्यं,
वाणिज्यार्थं प्रचुरतरणिश्रेणिभिः शोभमानः ।
वर्षे वर्षे त्रिदिवतटिनी यत्र सङ्गत्य भङ्गैः,
स्वां मङ्गल्यां सपदि वृणुते व्यायतां भक्तपूजाम् ॥७१॥

दूरात्तीर्थाभिषवविधये तत्र लोकाः समेता,
भागीरथ्या विजयनिनदैः शून्यमापूरयन्ति ।
स्रोतःक्षिप्तैर्विविधकुसुमैरन्तरं नीयमानै-,
र्यन्माहात्म्यं भवति विदितं दूरदेशेऽपि सद्भिः ॥७२॥

सिद्धः शास्त्रे किल नदवरो घर्घरस्तेन मान्यं,
तत्रोत्पन्नैरपि बुधगणैर्बुद्धिविद्यादिसिद्धैः ।
लोके जातं बहुपरिचितं पत्तनं कोट्टलाख्यम्,
मन्दाकिन्यादिभिरिव पुरं पावनं देवतानाम् ॥७३॥

यत्र प्रायः प्रतिजनगृहं वापिका स्वच्छनीरा,
वाप्यां वाप्यामपि कुमुदिनी पद्मिनी चातिहृद्या ।
प्रातः पद्मे कुमुदनिचये चापि भृङ्गाः प्रदोषे,
पीत्वा पुष्पासवमतिसुखं गुञ्जनं व्यञ्जयन्ति ॥७४॥

रम्या वापीतटपरिगताः पादपाः सप्रसूना,
आदर्शामे सुविमलजले द्रष्टुकामाः स्वमूर्त्तिम् ।
स्वीयच्छायामविकलतया वासरे पातयन्ति,
स्वीयं रूपं समभिलषितं सर्वजीवस्य लोके ॥७५॥

जीवा एव स्वककृतिवशाद् वृत्तभूयं भजन्ते,
संज्ञामन्तर्दधति किल ते कुर्वते चापि भोगम् ।
तस्मादेव प्रसरति सुखे वासना कापि तेषां,
द्वेषो दुःखेऽपि च तत इदं युज्यते निर्विकल्पम् ॥७६॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्यामः कश्चिज्जनयति नगो रक्तवर्णं प्रसूनं,
कश्चिच्चान्यः सितमथ परः पीतमन्योऽपि कृष्णम् ।
कार्य्ये हेतोर्गुणसमुदयो नीतिरेषा मृषा किं ?
नैषा मिथ्या यदिह धरणी सप्तरूपैव हेतुः ॥७७॥

वापीनीरं सितमपि भुवोपाधिना यत्र नीलं,
शोभां धत्तेऽसितमणिमयादर्शवत् स्पर्शशीतम् ।
ग्रीष्मे सन्तर्पणमपि खरोत्तापतप्तं खरांशोः,
सन्तापाय प्रभवति परस्पर्शवीतस्वभावम् ॥७८॥

ग्रीष्मे तीव्रैस्तपनकिरणैरुष्णतां सम्प्रपन्ने,
वापीनीरे जगति नितरां जातवत्यर्द्धशुष्के ।
मेघोत्सृष्टं शिशिरसलिलं प्राप्य वृष्ट्याद्यपाते,
तीरं सर्पन्त्यनुगतगणास्तत्र मीनाः कवय्यः ॥७९॥

दृष्ट्वा नीरात्तटमुपगतास्ताः समुत्साहवन्तो,
वृष्टौ सत्यामपि परिगृहीतातपत्रा भवन्तः ।
दक्षा बाला अपि सुतरुणा मत्स्यधानीं दधानाः,
संगृह्णन्ति प्रियकवयिका रत्नवन्मीनभक्षाः ॥८०॥

भुक्त्वा भूमे रसमतिखरं तृप्तमात्मप्रियायाः,
सूरं काले जलधरगणाश्छादयित्वा हि तस्याम् ।
हर्षाद् वर्षासमुचितरसं निक्षिपन्त्यप्रमादं,
भीत्येवान्तः खरसविगमापाण्डुदेहा विटाभाः ॥८१॥

वर्षाकालप्रकृतिवशतो यत्र जीमूतसङ्घे,
सत्यप्यम्भःक्षरणविमुखे प्रोच्छ्रसद्वारिधाराः ।
खातं क्षेत्रं जनपदपथं सर्वमाप्लावयन्ति,
काले तस्मिन् नहि तरिमृते क्वापि यानं जनानाम् ॥८२॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ग्रामप्रान्तस्थित-सुविततक्षेत्रमालाम्बुमग्ना,
यस्मिन् वर्षाविभवसमये सागराभा विभाति ।
तस्यां रूपं रुचिरमकरोत् पद्मकह्लारमाला,
वातक्षोभादपि समुदितस्तत्र वीचिप्रपञ्चः ॥८३॥

यत्र क्षेत्रे निरवधिजलप्लाविते प्रेर्य्यमाणा,
दृष्टिः पश्यत्यमलसलिलान्नान्यदब्धिप्रमाणे ।
दृष्ट्वा स्वच्छं सलिलममितं कौतुकादुल्लसन्त-
स्तर्य्यां चर्य्यां तरुणनिकराः काममायोजयन्ति ॥८४॥

स्पर्द्धाविद्वास्तरिमुपगता यत्र दृप्ता युवानो,
नौकामन्यां जवपरिगतां जेतुमात्मीयनावा ।
यावच्छक्यं द्रुतमतितरां क्षेपणीं पातयन्तः,
प्रोत्साहार्थं स्वकृतिसुहृदां वाचमावर्त्तयन्ति ॥८५॥

तत्र क्षेत्रे भवति पयसो यावती नित्यवृद्धिः,
शस्यस्तम्बा अपि विदधते तावतीं वृद्धिमिद्धाम् ।
तस्मान्नीरोच्छ्वसनजनिता न क्षतिः कापि तत्र,
स्वीये वीर्य्ये रिपुबलसमे नो पराभूतिशङ्का ॥८६॥

केदाराणां जलगततया भेदचिह्नावलोपाद्-
धान्याग्राणामपि सुमिलनाद् भूमिभेदो न लक्ष्यः।
धान्यच्छित्तेरुचितसमये सारयित्वा तदग्रं,
यत्र क्षेत्रात् कृषकनिकराः स्वस्वशस्यं भजन्ते ॥८७॥

पक्वं शस्यं सुनिपुणशुकाः संग्रहीतुं सयत्ना,
यावच्छस्योपरि विदधति न्यस्तमात्माङ्घ्रियुग्मम् ।
शस्यस्तम्बावनमनवशादासितुं नो समर्थाः,
स्वल्पं चञ्च्वा सपदि दधतः शस्यमूर्ध्वं पतन्ति ॥८८॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

शालिस्तम्बा नमितशिरसः शस्यभारेण भूयो-
विद्याभाजां विनयमवतां साम्यमासादयन्ति ।
नालं क्षेप्तुं भवति पवनस्तान् विनम्रोत्तमाङ्गान्,
लोके योग्या विनयघटना बाधितुं प्रातिकूल्यम् ॥८९॥

दीना मग्नं पयसि सदनं वीक्ष्य वंशैस्तथान्यैः,
कृत्वा मञ्चं तदुपरि नरा यत्र कुर्वन्ति वासम् ।
केचिद्दीनाः स्वजनसहिताः कष्टमाश्रित्य नौकां,
दीर्घं वर्षासमयमुदितं यापयन्ते कथञ्चित् ॥९०॥

निम्नक्षौणीकृतवसतयो यद्गता जम्बुकाद्याः,
स्वप्राणार्थं जलदसमये प्रोन्नतां यान्ति भूमिम् ।
स्थाने स्थाने भुजगनिवहा गेहरन्ध्रेषु लीनाः,
सृष्ट्याण्डानां मनुजविपदं भाविनीं सूचयन्ति ॥९१॥

एकीभूते सकलसलिले वार्षिकोच्छ्वासहेतो-
र्मीना यस्मिन् सुखवसतये दीर्घिकाः संश्रयन्ते ।
वर्षाकालात् परमथ बहिस्तोयभारे विशुष्के
ताखावद्धाः सुनिपुणधृता जीवनं हा त्यजन्ति ॥९२॥

ग्रीष्मे भानोः किरणनिकरैः प्लुष्टकायाः प्रकामं,
मेघाम्भोभिः शिरसि सलिलैरुच्छ्वसद्भिश्च मूले ।
सिक्ता यस्मिन्नवरसभरैः पादपाः स्निग्धपर्णा,
रोगक्षीणा इव सुतरुणा भेषजैराप्तवीर्य्याः ॥९३॥

वात्यावेगाद् भुवि निपतिते पादपे शीर्णमूले,
यस्मिन् वल्ली तदुपरिगता लुण्ठिता भूमिपृष्ठे ।
गाढं दुःखं जनयतितरामन्तरे सज्जनानां,
पत्यौ प्रेते विकलकरणा मूर्च्छितेवार्त्तपत्नी ॥९४॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

एकं वृक्षं परतरुशिरस्यात्मशाखाप्रतानै-,
र्वीत्याक्षोभादतिगुरुतरामाहतिं साधयन्तम् ।
मत्वा निष्कारणमपकृतिव्यापृतं वीरमानी,
सोऽसौ तुल्यो रिपुरिव करोत्याहतिं तस्य शीर्षे ॥९५॥

अत्युद्दामः सपदि पवनः काननान्तद्रुमाणां,
पुष्पं पक्वं फलमपि लघु प्रापयन् दूरदेशम् ।
भूमौ कस्याश्चन विसृजति प्रौढ़दस्युर्यथा स्वं,
शोच्यास्तेन प्रसवरहिता हन्त निःस्वा इवामी ॥९६॥

नालं हर्त्तुं प्रसवनिचयं मत्तवात्या तु येषां,
ते निस्तब्धप्रकृतिमुदिता व्यक्तशुभ्रप्रसूनाः ।
हास्येनेव प्रसवरहितं मूढ़मासूचयन्ति,
वित्ताधीशः परमवहितो नैति चौराद् विपत्तिम् ॥९७॥

यस्मिन् कृष्ट्वा कृषकनिकराः शस्यभूमिं स्वकाले,
सारं क्षिप्त्वा क्षितिपरिमितां वीजराजिं वपन्तः ।
नीरोच्छ्वासे प्रकृतिसुलभे वार्षिके सव्यपेक्षा,
नैको हेतुः फलति रहितो हेतुभिस्तावदन्यैः ॥९८॥

सार्द्धं शस्याङ्कुरसमुदयेनोद्गता उद्भिदो ये,
वृद्धौ वार्धां विदधति परां जातशस्याङ्कुराणाम् ।
तेषामुत्सारणविधिकृते कर्षकाः क्षेत्रमध्ये,
मत्वा तुच्छं मिहिरकिरणं श्रान्तिसीमां सहन्ते ॥९९॥

यत्र प्रातः पतिमतिगुरुं सर्वतः कामिनीनां,
साध्वी श्रद्धाकलितहृदया सादरं वन्दमाना ।
तूर्णं शय्यां परिहृतवती सूरसूतं ह्यनूरुं,
दृष्ट्वोद्यन्तं सुरपतिदिशि व्योमभागे नमन्ति ॥१००॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सायं शङ्खध्वनिभिरनघैरम्बरं व्याप्तुवाना,
देवागारे भवनविवरे श्रीतुलस्याश्च मञ्चे ।
नत्वा कण्ठोद्गमितवसनं भव्यतैलप्रदीपान् ,
दत्ते सैषा सकलकुशलं भावि संलिप्समाना ॥१०१॥

सर्वं गेहं रजनिविगमे गोमयेनोपलिप्य,
सर्वत्रैवाजिरपरिसरे गोमयाम्भः क्षिपन्ती ।
स्मृत्वा देवान् पतिपदमपि क्षेमकामा वधूटी,
गृह्यं कार्य्यं परमपि मुदा साधयत्यप्रमत्ता ॥२०२॥

साक्षाल्लक्ष्मीरिव गृहवधूर्यत्र गृह्ये विधाने,
पातिव्रत्ये विमलचरिता जानकीव प्रसिद्धा ।
भक्ष्याधाने सुमधुररसे शङ्करीवान्नपूर्णा,
लज्जाशीला ललितवचसा रम्यपीयूषजेत्री ॥१०३॥

श्वश्रूं देवीमिव गणयति भ्रातृभूतान् श्वशुर्य्यान् ,
देवाधीशं श्वशुरमथवा स्वेन तातेन तुल्यम् ।
स्वीयं गेहं श्वशुरनिलयं तज्जनान् मित्रभूतान् ,
शीलौदार्य्यान्नयति सकलं सा सदा वश्यभूयम् ॥१०४॥

स्वल्पः कालोऽजनि कलयतां यत्र पाश्चात्त्यविद्यां,
हित्वा लोकोपकृतिशिथिलां वृत्तये प्राच्यविद्याम् ।
स्यान्नास्तिक्यं समधिगतया प्रौढ़पाश्चात्त्यमत्या,
ध्यात्वा ह्येवं न सुतमनयत् कोऽपि विद्यां प्रतीच्याम् ॥१०५॥

यस्मिन् वैधः परिणयविधिर्बाल्यकाले जनानां,
जायापत्योः प्रणयदृढ़तासाधनं सौख्यहेतुः ।
पत्युर्गेहस्थितिरतिदृढ़ा तेन चित्ते वधूनाम् ,
आमे पात्रे भजति विहिता स्थास्नुतामेव रेखा ॥१०६॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पत्पुर्गेहे समधिकवयस्यागतायाश्च वध्वां,
तद्वंशस्यानुगुणनियमा नो तदन्तर्विशन्ति ।
तस्मिन् काले परिणतमतिर्नापि गृह्णाति शिक्षां,
पात्रे रेखा न भवति दृढ़ा वह्निसम्पर्कपक्वे ॥१०७॥

यस्मिन् सर्वा नवगृहवधूमालिकाः सावगुण्ठा,
वक्त्रं रक्षन्त्यभिकतरुणालोकमार्गात् प्रयत्नात् ।
यासां रम्यं वदनकमलं कामिनो द्रष्टुकामा,
वस्त्रस्यान्तर्नयनयुगलं वक्तारं क्षिपन्ति ॥१०८॥

पातिव्रत्यव्रतपरिचिता मेध्यशीलाश्च वध्वो-,
बुद्ध्वाऽमेध्यां तरुणरचितां दृष्टिभङ्गीं निजाङ्गे ।
तूर्णं लीना इव नयनता लज्जिता मेध्यगेहे,
गङ्गाभङ्गेष्विव कलुषिता भीतभीता विशन्ति ॥१०९॥

बाला हित्वाध्ययनमुचितं क्रीड़नं नाचरन्ति,
काले क्रीड़ामपि विदधति स्वास्थ्यसौख्यानुकूलाम् ।
गुर्वादेशान्निजमभिमतं वस्तु यत्र त्यजन्ति,
सद्वृत्तानां विनयमवतां सिद्ध एष स्वभावः ॥११०॥

एवं नानागुणपरिचयैः पत्तनं कोट्टलं तन्-,
नित्यं संवर्द्धयति धरणौ भारतस्याभिमानम् ।
क्षौणी सर्वा यदि च भजते तुल्यरूपादियोगं,
स्वाधेयानां गुणगणवशात् कापि शस्ता तथापि ॥१११॥

इति महामहोपाध्याय-श्रीकालीपदतर्काचार्य्यकृते 'मन्दाक्रान्तावृत्ते'-
खण्डकाव्ये कोट्टलपत्तनवर्णनं नाम प्रथमो विलासः ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

द्वितीयो विलासः

इत्थं वङ्गेष्वति परिचिते पत्तने कोट्टलाख्ये,
पुण्याचारः सुविमलमतिः काश्यपो विष्णुदासः ।
स्वर्गावासे गुरुरिव गुरुस्तर्कविद्याधनाना-,
मासाञ्चक्रे किल धवलयन् ज्ञानकीर्त्या दिगन्तान् ॥१॥

सौम्ये ब्राह्मे द्विजततिहिते पुण्यपुण्ये मुहूर्त्ते,
सुप्तिं त्यक्त्वा व्यधित किल यः पूर्वसन्ध्यासमर्चाम् ।
सौरः सूतो नभसि पतितस्तं प्रबुद्धं लुलोके,
किं तेनासौ परिभवरुषा रक्तभावं नु वव्रे ॥२॥

प्रातः सूर्य्यं सन्नति-सजवापुष्परक्तानुलेपं,
भक्त्याभ्यर्च्य व्यघटयदसौ नित्यशः प्रत्यवायम् ।
स प्रोद्यन्तं मिहिरमरुणं वीक्ष्य रक्तार्घ्यसक्तं,
मत्वा सिद्धं दशशतकराभ्यर्चनं साधु मेने ॥३॥

कुञ्जे कुञ्जे रजनिविलये मञ्जु गुञ्जद्द्विरेफै-,
र्नीडालीनैरपि नियमतो गीतकृद्भिर्विहङ्गैः ।
पूर्वा वैतालिकतुलनया यत्प्रबोधाय सन्ध्या,
नैशे शेषेऽहरदहरहः सुप्तिजाड्यं हि तस्य ॥४॥

श्रुत्वा यस्यालयपरिजनाः श्रौतमन्त्रप्रपाठं
शुद्ध्या मेध्यं सुमधुरमुदात्तादियोग्यस्वराढ्यम् ।
ज्ञात्वा रात्रिक्षयमनलसाः सम्परित्यज्य शय्यां,
कृत्यं कर्त्तुं बहु समुचितं दैनवृद्धिं प्रचक्रुः ॥५॥

प्रातः पूर्वाचलशिखरतो वीक्ष्य तेजो यदीयं,
रागं तस्मिन् रविरुपगतस्तेन रक्तो व्यराजीत् ।
तेजोवृद्ध्या तदनु च जहौ तेजसस्तस्य रागं,
तेनैवासौ किमु समभवद् रक्तभावेन मुक्तः ॥६॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ध्वान्तालोकौ व्यधिकरणतामेव यातो मिथः स्तो,
ज्ञानालोकात् तिमिरमगमद् यस्य तस्मात् सुदूरम् ।
ज्ञानालोकादपि सुविपुलान्नाप तृप्तिं तदन्तः,
यस्माद् वृद्धे वयसि च दधौ सोऽनिशं तन्त्रचर्चाम् ॥७॥

सूर्य्यस्तुल्यस्तिमिरहरणे यस्य विद्याधनस्य,
बाह्यं सूर्य्यो हरति न पुनश्चैत्तमित्येव भेदः ।
बाह्यं हर्त्तुं कथमपि बभूवैष धीरः समर्थ-
श्चैत्तं किन्तु प्रखरकिरणो नालमासीत् स हन्तुम् ॥८॥

शास्त्रार्थेषु क्वचिदुपनते संशये यस्य दुःखं,
पुत्रोत्पत्तेरपि समधिको यस्य तस्य व्यपायः ।
निद्राहारौ परिहृतवतो यस्य शास्त्रार्थचिन्ता,
स्वप्नेऽप्यस्यास्यत उदचरद् भूरिशास्त्रार्थवादः ॥९॥

लोके नित्यं विनयमवतोऽप्यस्य शास्त्रार्थवादे,
सिंहस्येवोत्कटविलसितं वैरिपक्षापहारि ।
शास्त्रार्थेषु प्रकटितमसौ नान्यगर्वं प्रसेहे,
सिंहः सिंहान्तरकृतमिवोद्गर्जनं वीर्य्यशंसि ॥१०॥

शिष्यः पुत्रादपि समधिको यस्य शास्त्रे सुदक्षः,
शास्त्रार्थानां मननमसमं यस्य सर्वस्वभूतम् ।
सन्न्यासीव प्रचितमहिमा त्यक्तसर्वप्रपञ्चो-
ज्ञानधानं परमशरणं क्षेमदं स प्रचक्रे ॥११॥

औदासीन्यं विषयनिचये नैव शास्त्रार्थवादे,
सङ्गो विद्वत्परिषदि सदा यस्य नो दुष्टगोष्ठ्याम् ।
पुण्ये प्रीतिर्न खलु दुरिते स्वप्नमात्रेऽपि सिद्धा,
वाचः शुद्धा न हि समुदिताः स्वप्नकालेऽप्यमेध्याः ॥१२॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

भक्तिर्देवे न विभवलवे नापि पापिप्रतापे
स्नेहः शीलं यति परिजने दुर्नये नैव दैवात् ।
वैधे कृत्ये चिरमभिरुचिर्नैव वैधे विधाने,
श्रद्धा शुद्धात्मनि जनगणे नैव दोषेण जुष्टे ॥१३॥

बाल्ये श्रद्धामहितमनसा पुण्यगीर्वाणवाणी,
येनाधीता कृतिवरगुरोः पादपद्मोपकण्ठे ।
दीपाद् दीपान्तरमिव ततः सोऽपि जज्ञे जगत्यां,
दक्षः ख्यातस्तिमिरहरणे प्राप्तभूरिप्रकाशः ॥१४॥

तत्त्वं सूत्रप्रतिममददात् स्वल्पमात्रं गुरुर्यत्,
तोये स्वच्छे प्रसरति यथा तैलविन्दुः प्रकीर्णः ।
लेभे स्वान्ते प्रकृतिविमले विस्तृतिं तद्धि तद्वद्,
आधारस्योत्तमगुणवशाद् वस्तु वृद्धिं वृणीते ॥१५॥

तस्य ज्योत्स्नावलिधवलया सर्वतः कीर्णकीर्त्या,
दूत्याहूता इव सुविमलज्ञानलोभात् सुशिष्याः ।
नानादेश्याः प्रतिदिनमुपेत्यास्य पादोपकण्ठं,
भृङ्गाः पुष्पासवमिव नवं तत्त्वमभ्येत्य हृष्टाः ॥१६॥

आस्याद् यस्य प्रकृतिसरसा सद्गुणा साधुहृद्या,
सालङ्कारध्वनिपदगता कामिनीव प्रसन्ना ।
दैवी वाणी श्रवणमनसोस्तर्पणी लब्धजन्मा,
तुल्यं तोषं परिषदि विदां विस्मयञ्च प्रतेने ॥१७॥

हृद्यैः पद्यैः सुपदघटितैः कान्तवृत्तैर्निबद्धैः,
काव्यं भव्यं कविजनमनस्तर्पणं भूरि कृत्वा ।
कीर्त्तिं ज्योत्स्नाविजयजननीं यः सितां सम्प्रसार्य्य
सर्वां श्वेताम्बरपरिवृतां भूतधात्रीं प्रचक्रे ॥१८॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ये ये काव्ये कविबहुमताः सन्ति चित्रादिभेदा-
स्तस्योत्कर्षः किल समभवत् तेषु सर्वेष्वदभ्रः ।
सृष्टं येन प्रकटितगुणं हेलया वापि काव्यं,
प्राचीनानां स्मृतिमजनयत् कीर्त्तिभाजां कवीनाम् ॥१९॥

लोकातीता सरसकविता कालिदासादिरीत्या,
प्रीत्याधानं नृषु विदधती यस्य नित्यं प्रवृत्ता ।
तर्कोत्कर्षं न लघुमकरोद् दिव्यशक्त्यान्वितस्य,
नैकः सूते किमिह भगवान् सर्गमन्तं स्थितिञ्च ॥२०॥

तर्केऽप्यर्कप्रतिमखरधीरेष विद्यावदातो
नानाग्रन्थानमलसरलव्याख्यया व्याचचक्षे ।
अन्यग्रन्थानपि स विदधे तर्कमूलान् स्वतन्त्रान्,
यत्रामुष्य प्रकटमभवत् तर्कविद्याप्रभुत्वम् ॥२१॥

विद्योत्कर्षे शितमतिजनाध्यापने ग्रन्थबन्धे,
व्याख्याकृत्ये ललितकवितासन्निबन्धेऽतिवन्द्ये ।
गीर्वाणानां वचनवचने तुल्यरूपास्य शक्तिः,
सिद्धा लोकान्तरविजयिनी पप्रथे काप्यपूर्वा ॥२२॥

शीलं तस्य त्रिदिवतटिनीतोयतुल्यं पवित्रं,
लोकानाकारयति नतये पादपद्मद्वयस्य ।
तत्तेनाधिष्ठितमतितरां पत्तनं गौरवाढ्यं,
स्पर्द्धां वाचस्पतियुतदिवा सार्द्धमद्धाभ्युपैति ॥२३॥

साक्षाल्लक्ष्मीरिव गुणवती तस्य पत्नी सुवृत्ता,
नाम्ना पद्मा तदुदवसितं भूषयामास काले ।
तस्या विश्वोत्तरगुणगणैः कृष्टमिष्टं समग्रं,
व्यग्रीभूतं सपदि मिलितं तत्र लोकैर्लुलोके ॥२४॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

माता कन्यामिव नववधूं विष्णुदासस्य लब्ध्वा,
प्रीता तस्या विनयविभवैः कृत्यनैपुण्ययोगैः ।
तस्यां गृह्याचरणमखिलं न्यस्य विश्वातिशायि-
श्रेयो मत्वा तदुपगमनं पुष्कलां शान्तिमापत् ॥२५॥

तातो वृद्धः प्रकृतिसुकृती प्रातरारभ्य सायं,
यावद्देवायतनशरणो वैधकृत्येषु लग्नः ।
औदासीन्यं गृहसमुचितव्यापृतौ पुत्ररीत्या,
श्रित्वा नित्यं सुरगणसमाराधनामेव वव्रे ॥२६॥

कृत्वा पूजां प्रतिदिनमसौ विष्णुमुख्यामराणाम्,
शुद्धश्चित्ते वहिरपि जहद् वाह्यरागं प्रकामम् ।
भक्त्या युक्तः सजलनयनः सात्त्विकेनान्तरेण,
पुत्रादीनां परिजननृणां सर्वभव्यं ययाचे ॥२७॥

भक्त्या तस्य प्रचितकरुणः पूजितो देववर्गः,
कल्याणानां चयमजनयत्तस्य कामानुरूपम् ।
जातः पुत्रो भुवनविजयी कोविदः शुद्धशीलः,
कान्ता तस्याप्यतिगुणवती मूर्त्तपद्मालयेव ॥२८॥

भार्य्या धुर्य्या गृहकृतिविधौ सात्विकाचारवित्ता,
नाम्ना गौरी पतिमनुगता शैलपुत्रीव शम्भुम् ।
रूपे लक्ष्मीरिव गुणवती भारतीव प्रसन्ना,
गुर्वादेशे नियतमुषिता यां स्नुषाम्बामिवार्च्चत् ॥२९॥

स्वस्थः सर्वः परिजनगणस्तस्य पुण्यप्रभावात्,
सर्वं काम्यं सममभजत स्वान्तसन्तृप्तिहेतुम् ।
स्वीया भूमिर्यदुपहरति स्वल्पधान्यादिवित्तं,
पुत्रो यच्चार्जयदुपकृता तेन संसारयात्रा ॥३०॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सत्यप्येवं चिरपरिचिते संसृतौ दीनभावे,
लिप्तं दुःखं न मनसि तदा नीरवत् पद्मपत्रे ।
सन्तः कान्तं विषयजसुखं नैव सम्भावयन्ते,
धर्म्याचारं घटयितुममी प्राणरक्षां चतन्ते ॥३१॥

नानादेशागतबहुमतच्छात्रवृत्त्यर्थमर्थो,
भूपोपान्ते समगत यदा कोविदो विष्णुदासः ।
तस्मिन् काले पुरनरपतिः स प्रकृत्या वदान्यः,
प्रादादर्थं तदभिलषितं तेन दैन्यं व्यतीतम् ॥३२॥

इत्थं काले कियति विगतेऽपत्ययोग्ये स्नुषाया,
आविर्भूते वयसि समभूद् विष्णुदासस्य तातः ।
वंशस्थित्यै सुकृतशरणः पौत्रवक्त्रं दिदृक्षु-
र्नित्यं याच्ञामकृत च पदे देवतानां स एवम् ॥३३॥

देवाः ! सेवां चरति भवतां प्रत्यहं दास एष,
पत्रं पुष्पं फलमथ जलं वः स्वशक्त्या प्रदत्ते ।
युष्मद्ग्राह्यं तदपि सकलं भक्तिपूर्वं प्रदत्तं,
तस्माद् यूयं कुरुत करुणां पौत्ररत्नानुकूलाम् ॥३४॥

पुत्रः पौत्रोऽप्यथ तदनुगा वंशधारामवन्ति,
नृणां लोकद्वयहितकृतस्ते ध्रुवं सम्भवन्ति ।
जीवत्स्वस्मिन् जगति पितृषु प्राप्तकीर्त्तिप्रतानाः,
कीर्त्तिं तेषां विदधति महासौख्यजालेन सार्द्धम् ॥३५॥

वृद्धे जाते पितरि सुतरां शक्तिशून्यत्वमाप्ते,
गत्वान्यत्र स्वमशनमुपाहर्त्तुमस्मिन्ननीशे ।
अन्नं वस्त्रादिकमपि ददज् जीवनस्योपकर्त्ता,
योग्यः पुत्रो भवति भविनामैहिकक्षेमकारी ॥३६॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ताते चाथ त्रिदिवशरणे साधितैस्तर्पणाद्यैः,
श्राद्धैः श्रद्धान्वयमुपगतैस्तस्य तृप्तिं विधत्ते।
किञ्चाक्षय्यं जनयति सुखं कृत्यधाराविशेषै-,
स्तस्मात् पारत्रिकहितकरं पुत्ररत्नं नराणाम् ॥३७॥

येषां छिन्ना भवति भविनामन्तरा वंशधारा,
कष्टं तेषां भवति भयदं क्षुत्तृषाभ्यां परस्मिन्।
प्राप्ते वृद्धे वयसि च निराहारया कष्टगत्या,
सत्यप्यायुष्यपचितबलास्ते ह्यकाले म्रियन्ते ॥३८॥

किञ्चित्कालात् परमथ जगत्यत्र तेषां मृतानां,
वंशच्छेदाद् भवति नियतं हन्त नामापि लुप्तम्।
नामोल्लेखं विदधति सुतास्तर्पणादौ पितॄणां,
निःसन्तानाः किल पितृगणास्तर्पणेनापि हीनाः ॥३९॥

सन्त्यद्यापि क्षितिपरिसरेष्वन्वयाः काश्यपाद्या,
येरद्यापि स्मृतिपथचरः पूर्वजः कश्यपादिः।
कन्योद्वाहे स्मृतिमतवरोद्वाह्यतादेर्विचारे,
तत्तद्गोत्रप्रवरमुनयः संस्मृतिं यान्ति नूनम् ॥४०॥

तत्तद्धेतोरिह हिततमा वंशधाराभिरक्षा,
यस्माच्छास्त्रेष्वपि सुविहिता दत्तकादिव्यवस्था।
शास्त्रादेशो न खलु विफलः स ह्यभूद् दिव्यदृष्ट्या,
कारीरादौ फलपरिचयात् सत्यतास्योपपन्ना ॥४१॥

तस्मात् पौत्रं वितरत सुरा वंशरक्षानिदानं,
सोऽयं भर्त्ता जगति भविता वृद्धभावे पितॄणाम्।
प्रेतीभावेऽपि च घटयिता तर्पणाद्यैः सुतृप्तिं,
नो सत् पुत्राः पितृगणकथां पावनीं विस्मरन्ति ॥४२॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

एवं नक्तन्दिवमभिलषन् पौत्रवक्त्रावलोकं
यावद् दीर्घं समयमनयद् विष्णुदासस्य तातः ।
तावत् पौत्रानुदयवशतो व्यर्थकामो विषण्णः,
स्मृत्वा देवानवददमितां कर्कशाक्रोशवाणीम् ॥४३॥

देवा यूयं न भवथ, मृषा शास्त्रसन्दोहवाणी,
ज्ञानी किं तां समनुसरति व्यर्थभावस्वभावाम् ।
कारीरादौ न खलु सलिलाद्यर्थतः सा प्रमाणं,
तत्तद्योगो भवति भुवने काकतालीयनीत्या ॥४४॥

देवाः स्वार्थं किल कलयितुं कल्पितास्तन्त्रकारैः,
सारैर्हीना वचनरचनाराधनागोचरैषाम् ।
देवैश्वर्यं गगनकुसुमं कल्पनामात्रसारं,
केनाप्येतन्नहि परिचितं, नास्तिका एव विज्ञाः ॥४५॥

तस्मादद्यावधि न भवतामर्चनां साधयिष्ये,
सर्वं वैधं विधिमपि पुरो निश्चितं वर्जयिष्ये ।
देवा मिथ्येत्यवितथवचः सर्वतो घोषयिष्ये,
व्यर्थास्तिक्यं जगदधिगतं यत्नतो वारयिष्ये ॥४६॥

शालग्रामः प्रतिदिनमसौ विष्णुबुद्ध्यार्चितो यः,
सोऽयं नान्यत् किमपि, विदितः सोऽद्य पाषाणमात्रम् ।
यच्चाप्याराधयति जनता शाम्भवं बाणलिङ्गं,
तस्यार्चाया न हि परशिलाद्यर्चनात् कोऽपि भेदः ॥४७॥

चण्डीपाठात् स्वरविघटनं व्यर्थमत्यर्थकष्टं,
ध्यानं स्तोत्रं विफलमखिलं, श्रान्तये मन्त्रजापः ।
तद्विज्ञानामलमिह सुरालम्बनेनेति वाणी,
सर्वत्रैव क्षितिपरिसरे वर्त्ततां सुप्रचारा ॥४८॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

उक्त्वा लोकायतपथगतामेवमाक्रोशवाणीं,
भुक्त्वा रात्रौ शयनमगमद् विष्णुदासस्य तातः ।
सोऽयं ध्यायन्नपि तदुचितानेव भावान् हृदन्तः,
किञ्चित्कालात् परमुपगतो ज्ञानविद्राविनिद्राम् ॥४९॥

सुप्ते तस्मिन्नथ दिवसकृन्मण्डलस्थः किरीटी,
हारी विष्णुः कनकघटितं कुण्डलं सन्दधानः ।
पद्मासीनः करतललसच्छङ्खचक्रो विचित्रः,
केयूराढ्यः कनकरुचिरः स्वप्न आविर्बभूव ॥५०॥

आविर्भूतस्तमवनिसुरं विस्मितं संनमन्तं,
क्रोधेनेवाकिरदिह गिरो, विप्र ! मां विद्धि विष्णुम् ।
यं सद्भक्त्या प्रतिदिनमसावर्चयंस्त्वं ह्यकस्मात्,
सत्ताशून्यं फलविरहिताभ्यर्च्चनं मन्यसे माम् ॥५१॥

भ्रान्तोऽसि त्वं परिहर महाभ्रान्तिमेतां दुरन्ताम्,
ईशः सिद्धो जगति बहुलैर्हेतुभिर्दोषमुक्तैः ।
वाणी तस्य श्रुतिरतिहिता नित्यभूतार्थवक्त्री,
भ्रान्त्या सोऽयं कमपि न वदत्यप्रमत्तो मृषार्थम् ॥५२॥

लोके वेदः स्मृतिरपि तथा वेदशास्त्राविरुद्धा,
धर्मे मानं भवति हि नृणां श्रेयसे निर्विवादम् ।
साध्वाचारः श्रुतिमनुगतो ह्यात्मनश्चापि तोषो,
धर्माचार्य्या जनगणहितायेत्यपि प्रोक्तवन्तः ॥५३॥

दीप्तप्रज्ञाः कति कृतिनराः सुप्रसिद्धाः पुरासन्,
येषां बुद्धौ श्रुतिपथगतं शास्त्रमाभात् प्रमाणम् ।
शास्त्रं श्रित्वा त इह विदधुः स्वीयकृत्यव्यवस्थाम्,
अन्येषामप्यतिशयहितायोपदेशं प्रचक्रुः ॥५४॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ते किं त्वत्तो मतिविरहिता येन ते नैव तत्त्वं,
ज्ञात्वा कृत्यं स्वमिह विदधुर्दिष्टवन्तस्तथान्यान् ।
त्वञ्चाद्यत्वे प्रतिहततमोराशिना मानसेन,
तत्त्वं जानन् सुरकुलमसन्मन्यसे शास्त्रमोषम् ॥५५॥

सर्वत्रैव प्रणयति फलं नैव देवार्च्चनादि,
तेनोन्नेयं न खलु सकलस्यैव तस्याफलत्वम् ।
साद्गुण्यं चेद् विधिषु नियता तत्र सिद्धिः फलस्य,
वैगुण्यञ्चेदुदयति फलं नैव, किन्तत्र चित्रम् ॥५६॥

कार्य्यं किञ्चिज्जनयति यथा कारणं दृश्यरूपं,
तद्वत् किञ्चिज्जनयति फलं कारणं दृष्टिवाह्यम् ।
यस्मिन् दृश्यं निखिलमुचितं कारणं सन्निकृष्टं,
तस्मिन् कार्य्येऽसति मितिमितोऽदृश्यहेतोरभावः ॥५७॥

नह्येकस्माद् भवति भुवने कारणात् कार्य्यसिद्धिः,
कार्य्योत्पत्तिः किल सुविदिता युक्तितो हेतुकूटात् ।
स्थूलेनाक्ष्णा त्वमिह नियतं वेत्सि पूजादिहेतुं,
नो तन्मात्रं त्वदभिलषितं दातुमास्ते समर्थम् ॥५८॥

विघ्नाभावस्त्वदभिलषिते कारणं क्लृप्तमन्यत्,
तस्याभावात्तव न सहसा जायते कार्य्यमथ ।
दुष्टादृष्टं किमपि भवतः काम्यसिद्धिं निरुन्धे,
तस्य ध्वंसे सति तव भवेन्निश्चितं काम्यलाभः ॥५९॥

विघ्नध्वंसं किल घटयितुं त्वं शतावृत्तिचण्डी-
पाठं विप्रैरनघचरितैः कारयस्व प्रयत्नात् ।
कृत्ये तस्मिन् विहितनियमैः सम्यगाप्ते समाप्तिं,
काम्यप्राप्त्या तव हृदि चितो दुःखराशिर्विनश्येत् ॥६०॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

देवैश्वर्यं वितथमिति यन्मन्यसे, मूर्खतैषा,
सृष्टिः सर्वानुसृतनियमा राजते कस्य हेतोः ?
ग्रीष्माद् वर्षा अथ किल शरत् कान्त-हेमन्तकालः,
तस्माच्छीतस्तदनु च कुतः स्याद् वसन्तः क्रमेण ॥६१॥

जीवो मासान् दश सकुशलं मातृगर्भे शयानो,
मातुर्भक्ष्यादुपगतरसो जीवनं स्वं दधाति ।
स्तन्यक्षीरं किल समुदितं गर्भनिष्क्रान्तिमात्रम्,
पीत्वा बालो यदुपलभते जीवनं शान्तिपूर्णम् ॥६२॥

बीजं किञ्चिद् भुवि निपतितं पादपं वल्लरीं वा,
सूते नीराद्यनुगतिवशान्मृत्तिकायाश्च सङ्गात् ।
एकां जातिं नयति नियमादेकजातीयबीजं,
तत्तत् कार्य्यं भवति नियमात् कस्य सम्प्रेरणेन ॥६३॥

ग्रीष्मे तप्तैस्तपनकिरणैर्भूर्यदा दग्धकल्पा,
लोकास्तापैरतिखरतरैर्भुञ्जते दुःसहार्त्तिम् ।
तावत्तापं शमयितुमपां धारया भूमिभागे,
को वा नेता नभसि जलदान् प्रेरयत्यप्रमत्तः ॥६४॥

मानातीतः पुलिनसविधे दत्तभङ्गप्रतानः,
पारावारोऽभिलषति यदि प्लावनं सर्वपृथ्व्याः ।
स्वेष्टं कर्त्तुं न हि खलु तदा स्वल्पकालोऽप्यपेक्ष्य-
स्तत् तं को वा तदभिलषिताद् वारयन् पाति पृथ्वीम् ॥६५॥

भानुर्भानुं विकिरति दिवा, नैव रात्रौ कदाचित्,
पूर्णश्चन्द्रो निशि, न दिवसे स्वीयरश्मीन् ददाति ।
अग्निर्दाहं सृजति सलिलं हन्ति तापं जनानां,
लोकः सर्वो नियममयते तत्र देवो नियन्ता ॥६६॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

शक्तिर्दृष्टे किल सुमहती गुल्मवल्लीविताने,
मूले मण्यादिषु कृतिमिता भिन्नवस्तुप्रपञ्चे ।
लोकादृष्टेऽपि च नियमिता स्वीयकार्य्यस्य शक्ति-
र्नीतिस्तेषां न हि विघटते तत्र कोऽन्यो नियन्ता ॥६७॥

कर्त्ता कश्चिद् भवति नियतं चेतनः कार्य्यजाते,
जीवो नालं गिरिरुहतरुं कार्य्यभूतं विधातुम् ।
तस्मादीशः सृजति सकलं लाघवात् सोऽपि चैकः,
सृष्ट्यादार्थं स भजति विरिञ्च्यादिदेहानदेहः ॥६८॥

सोऽयं भूत्वा सृजति भुवनं ब्रह्मरूपं दधानो,
विष्णुर्भूत्वावति हरवपुर्धारयन् हन्ति सर्वम् ।
सौख्यं दुःखं नियमयति स प्राक्तनादृष्टभेदात्,
तस्मान्नासौ भवति विषमो निर्घृणो वेति वाच्यः ॥६९॥

तन्नास्तिक्यं परिहर सुरास्कन्दनं नैव कुर्य्याः,
सम्पूज्यानां निकृतिषु रतिर्दुःखधारां प्रसूते ।
विन्दास्तिक्यं चिरपरिचितं मोहराशिं निरस्यन्,
क्षेमं काले भज समुचितं कृत्यजातं चरित्वा ॥७०॥

मन्निर्देशं ध्रुवमनुसरन् लप्स्यसे सत्वरं त्वं,
पौत्रं जैत्रं बुधपरिषदां शीलसम्पत्समृद्धम् ।
आस्याद् यस्योदयमुपगतापूर्वरूपा हि वाणी,
दैवी विद्वत्परिषदि विदां विस्मयं संविधाता ॥७१॥

नाशीरेषा मम किल वरो मन्यतामेष वादः,
कृत्ये सिद्धे सपदि वचनं भास्यतीदं यथार्थम् ।
इत्याकर्ण्य क्षितिसुरवरो विष्णुपादे नतोऽभूत्,
प्रोत्थायापि प्रकटवपुषं नैव विष्णुं लुलोके ॥७२॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

विप्रः सोऽतः परमपगतस्वापजाड्याधिकारः,
स्वप्ने विष्णोरुपगमवशाद् भावयन् स्वं कृतार्थम् ।
तस्यादेशात् करतलगतां काम्यसिद्धिं प्रमेने,
सर्वं वृत्तं समवददपि स्वप्रियां सम्प्रबोध्य ॥७३॥

श्रुत्वा दैवं वरमतिमुदा विप्रभार्य्या तदासौ,
त्यक्त्वा शय्यां सजलनयना भक्तिभावानुषङ्गात् ।
पत्युः पादे प्रणमितवपुस्तेन युक्ता भवन्ती,
पूजागारेऽसकृदवनता विष्णुमादौ ववन्दे ॥७४॥

अन्ये देवा अपि गृहगता वन्दिता विप्रपत्न्या,
सर्वं काम्यं स्वहृदयगतं नामधारं निवेद्य ।
विप्रो भक्त्या प्रथमसमैश्वर्य्यमाश्चर्य्यरूपं,
स्तोत्रोच्चारं सकलशिवदं विष्णुमेवं ननाम ॥७५॥

विष्णो ! श्रीमन् ! सकरुणहृदे दानवारे ! नमस्ते,
धन्यो दासस्तव करुणया दर्शनं यद्गतोऽसि ।
ध्यानातीतस्त्वमसि महतां योगिनामप्यगम्यः,
सौम्यं रूपं तव करुणयैवाभिपश्यन्ति सन्तः ॥७६॥

मोहाक्रान्तो ह्यहमतितरां त्वामसन्तं विवृण्वन्,
ऐश्वर्य्यन्ते वितथमखिलं व्याहरन्निर्विकल्पम् ।
पादद्वन्द्वे तव विहितवान् दूषणं यद् विशालं,
तत्त्वं लीलामय ! करुणया दीनबन्धो ! क्षमस्व ॥७७॥

धात्रे पात्रे निखिलजगतां विश्वबन्धो ! नमस्ते,
कस्ते भूतिं निखिलजयिनीं देव ! शक्नोति बोद्धुम् ।
अज्ञानाद् वा विषमदुरितैश्चेतसो दूषणाद् वा,
संस्कारो मे चिरपरिचितः प्राप लोपं ह्यकस्मात् ॥७८॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कारुण्यानामसि जलनिधिर्नू नमेषोऽन्यथा चेत्,
किं मे काम्यावधिवरवरः स्यात्त्वया भो वितीर्णः ।
नष्टो मोहः स्मृतिरुपगता पूर्वसंस्कारजन्मा,
तस्मात्तुभ्यं शिवतम ! नमः शश्वदास्तां नमस्ते ॥७९॥

शङ्खं हस्ते वहसि परितो घोषणार्थं श्रुतीनां,
चक्रं धत्से विषमसुकृतारातिसन्त्रासनार्थम् ।
ध्वान्तं हन्तुं ज्वलितसवितुर्मण्डलं स्वीकरोषि,
पद्मासीनो गमयसि तथा मानसं कम्रभावम् ॥८०॥

त्वं केयूरं कनकरचितं कुण्डलं दिव्यहारं,
धृत्वा तत्तद्वपुरवयवे शीर्षदेशे किरीटम् ।
आत्माधीनं विपुलविभवं लौकिकश्चापि वक्षि,
विष्णो ! स्वर्णोज्ज्वलवरवपुस्त्वं, समास्तां नमस्ते ॥८१॥

कल्पस्यान्ते प्रलयसलिलैः प्लाविते सर्वविश्वे,
वेदान् सर्वान् जलनिधिगतान् वीक्ष्य तद्रक्षणेन ।
धर्मं पातुं स्थितिकर ! भवान् मीनरूपं दधानो,
वेदोद्धारं सपदि कृतवान्, मीनमूर्त्ते ! नमस्ते ॥८२॥

मग्ना यावत् प्रलयजलधौ भूतधात्री विपन्ना,
तत्तागाघे समगमदथोऽनाश्रयासौ क्रमेण ।
तस्मिन् काले स्थितिकर ! भवान् धारयन् कूर्मरूपं,
तस्मै पृष्ठं स्थितिपदमदात् कूर्ममूर्त्ते ! नमस्ते ८३॥

मग्ना पृथ्वी कथमिव जड़ा संश्रयेत् कूर्मपृष्ठं,
तस्माद् धृत्वा स्थितिकर ! महाशूकरस्य स्वरूपम् ।
दन्ताग्रेणाम्बुधितलगतां तां समुद्धृत्य यत्नात्,
कौर्मे पृष्ठे न्यधित महते शूकरास्तां नमस्ते ॥८४॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

धर्मद्वेषी दितिकुलधरो यो हिरण्याक्षनामा,
शक्रं जित्वा त्रिदिवनगराधीश्वरत्वं प्रपेदे ।
दुष्टं हत्वा तमतिमहसा तेन रूपेण स त्वं,
धर्मं रक्षन्नपि भुवनपः शूकरास्तां नमस्ते ॥८५॥

तस्य भ्राता कशिपुरभवद् यो हिरण्यादिरिद्धः,
प्रह्लादाख्यं स्वसुतमनिशं विष्णुभक्तं ववाधे ।
धृत्वा घोरं नरहरिवपुस्तस्य वक्षो विदार्य्य,
प्राणान् हृत्वा सुकृतमवहस्तन्नमस्ते नृसिंह ! ॥८६॥

दैत्याधीशं बलिमतिबलं वञ्चयित्वा त्रिपादा-
क्रम्यां भूमिं कलयितुमभूर्वामनब्रह्मचारी ।
सृष्ट्वा पादं निजबिभुतया नाभिमूलात्तृतीयं,
तं पातालं किल समनयो न्यस्य तं तस्य शीर्षे ॥८७॥

यावद् भूमौ परिहृतनयाः क्षत्रिया भूमिपाला,
मोहाविष्टाः क्षितिसुरगणास्कन्दनं संप्रचक्रुः ।
तावद् रामः परशुशरणः कीर्त्तितो जामदग्न्य,-
स्तानुच्छिद्य क्षितिमतितरां क्षत्रशून्यां चकर्थ ॥८८॥

यावद् रक्षःकुलमतिबलं धर्मविघ्नं वितेने,
हृत्वा सीता दशमुखभृता दूरलङ्काश्च नीता ।
तावद् गत्वा दशमुखपुरं तत् कुलध्वंसकारं,
रामः सीतां सुखमुदधरो राममूर्त्ते ! नमस्ते ॥८९॥

कंसादीनां दुरितसुहृदां भूपतीनां प्रभावाद्,
यावद् धर्मो विलयमगमद् ध्वंसनार्थं हि तेषाम्,
कृष्णं मित्यं त्वमुपकृतवान् दृप्तदैत्यं प्रलम्बं,
हत्वा लोके कुशलमकृथाः सीरपाणे ! नमस्ते ॥९०॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

हिंसावृत्तिर्जगति विततता यावदासीत् समस्ते,
वध्यारावैः करुणरुदितैश्चान्तरिक्षं प्रपूर्णम् ।
रक्तस्रोतः क्षितिमजनयत् पङ्किलां पङ्कपूर्णाम् ,
बुद्धो भूत्वा भुवि सुमहतीं शान्तिमाधत्थ तावत् ॥६१॥

वेदाद् बाह्यैरपि च यवनैर्यावदुद्दृप्तवीर्य्यैः,
क्रूराचारैर्नवपथगतैर्विप्लुतो वेदधर्मः ।
तावद् वीरोचितमभिनवं कल्किरूपं दधानो,
हत्वा दुष्टान् यवननिवहान् वेदधर्मं व्यरक्षः ॥६२॥

एवं नानाविभवमहते देव ! पृष्ठे नमस्ते,
स्फूर्जद्भूते ! प्रहरणभृते पार्श्वभागे नमस्ते ।
लीलाभाजे चिरमभिमुखे कम्रदृष्टे ! नमस्ते,
लोकाधीश ! प्रियतम ! सदा पादपद्मे नमस्ते ॥६३॥

विष्णो ! जिष्णो ! शिवमय ! नमस्तुभ्यमभ्यर्चिताय,
सर्वेशाय प्रचितरुचये भक्तभक्तिप्रियाय ।
नानारूपं जगति वहते सर्वकामप्रदाय,
सर्वज्ञाय श्रुतिसमुदितानन्तभूत्याश्रयाय ॥६४॥

वन्दे बन्धो ! तव खलु परा देवता भूतिभूता-
यासां शक्तिर्भवदनुमतं कार्य्यमेव प्रसूते ।
राजामात्या न हृदभिमतं भूपतेर्खङ्घयन्ति,
कुर्वे ताभ्योऽप्यनुदिशि नमः स्वस्ति कुर्वन्तु ता नः ॥६५॥

विप्रस्यैवं सुरगणनतिं कुर्वतस्तस्य वीता,
पूता रात्रिर्मुरहरकृपास्वर्गनद्याः प्रसेकैः ।
अस्तं सर्वं तिमिरमगमद् ब्राह्मणस्येव चित्ते,
सर्वाशासु क्रमश उदितो राशिभूतः प्रकाशः ॥६६॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

भूम्या साकं सुचिरमुषिता या सखीव त्रियामा,
तस्याः काले विलयनवशाद् भूमिरासाद्य शोकम् ।
नैशापायोचितखगरवैः शोचनैरत्युदात्तै-
र्नीहाराश्रुप्लुतवपुरहो रोदनं किं चकार ॥९७॥

शून्ये दैनद्युतिविलयनं वीक्ष्य पूर्वं प्रदोषे,
हृष्टोलूका नभसि पतिता वासवृक्षं त्यजन्तः ।
ये दूरान्तं मुदितमनसः प्रस्थितास्ते प्रभाते,
प्रत्यावृत्तिं व्यदधत दिशः सप्रकाशाः समीक्ष्य ॥९८॥

अस्तं यान्तं शिशिरकिरणं भोगकालावसाने,
साध्वी रात्रिश्चिरमनुगता कान्तमत्यन्तमुग्धा ।
सम्पश्यन्त्या तदनुगमनं कुर्वती पुण्यकृत्यं,
रम्यैर्गीतैः किमु सुवयसां वन्दितासौ प्रकृत्या ॥९९॥

सर्वां रात्रिं सितकरकरस्पर्शभोगं व्रजन्ती,
पत्या सार्द्धं मधुकररवैः शोभनं संलपन्ती ।
सौम्या सोमानुगकुमुदिनी सुप्तिजाड्यं वहन्ती,
नेत्राकारं स्वदलनिकरं प्रत्यभात् संकुचन्ती ॥१००॥

ज्योत्स्नास्नातः कुमुदनिवहः शुभ्रवर्णः स्वभावा-
न्नो यामिन्यामजनि विदितस्तं समादातुकामैः ।
प्रातर्यावत् सितदलचयस्तत्र सङ्कोचमापत्,
तावज्ज्ञातः समजनि बहिः श्यामपत्रानुभूत्या ॥१०१॥

सुप्तिं याते निशि जलगते सर्वतो मीनजाले,
वाप्यः सर्वाः स्फटिकमुकुरैस्तुल्यरूपा व्यभासुः ।
मीनोच्छ्वासादुपगतवति प्रातरालोलभावे,
तद्वैषम्यं मनुजनिवहैर्निश्चितं तत्र सम्यक् ॥१०२

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ईशादेशादखिलरजनीं पूर्वशैलान्तराले,
स्थित्वा प्रातर्नियतसमये प्राप सूरः प्रकाशम् ।
राजादेशादिव सतिमिरं घोरकारानिकेतं,
श्रित्वा कालं कमपि समये मुक्तिमाप्तेव वन्दी ॥१०३॥

सर्वे शैला बहुतरुलताच्छन्नरूपा निशायां,
घोरा दृश्यास्तिमिरकलिता घोरभूतैः समानाः ।
नो प्रत्यक्षा जगति भविनां दृष्टिभाजां पिशाचा,
इत्थम्भूतं व्यदधत मृषा शास्त्रसिद्धान्तवादम् ॥१०४॥

नैशावृत्यानधिगतवपुर्वर्तितत्तद्विशेषाः,
सूर्य्यालोकात् स्फुटपरिचिता वृक्ष-गुल्मादिभेदाः ।
भीतिं चित्ते निशि परिगतां पश्यतां मानवानां
भूतभ्रान्त्या समुपजनितां प्राक्तनीं संन्यरुन्धन् ॥१०५॥

अन्धीभूते जगति तिमिरैः सन्निकृष्टैः प्रकृत्या,
जीवा जोषाकरकरपरामर्शहेतोः कथञ्चित् ।
मार्गे मार्गे व्यदधत गतिं ये पुरा रात्रियामे,
ते वै प्रातर्दिनकरकरं प्राप्य हृष्टाः सहायम् ॥१०६॥

लोकव्याप्तं तिमिरमसितं लोकदृष्टेर्विघाताद्,
दोषग्रस्तं दिनकरकरे शासितुं सम्प्रसृप्ते ।
तत् किं भीत्या विषमविषमाच्छासनाद् दण्डनीत्या
दूरादृश्यक्षितिधरगुहाकेतनादौ प्रविष्टम् ॥१०७॥

दीर्घं कालं मिहिरविरहाज्जातशोका धरित्री,
नीलं ध्वान्तावरणमवृणोल्लक्षणं दुःखराशेः ।
तस्या रागादरुणितवपुर्वासरेशः प्रभाते,
नीलं देहावरणमरुणो व्याधुनोत् किं करेण ॥१०८॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

दृश्याकारा निशि तनुतरा रोचिषा दिव्यताराः,
प्रातः सूर्यद्युतिपरिभवान्नैव दृश्यस्वरूपाः ।
सूर्य्ये किं ताः समधिकमहःकर्षणात् सम्प्रविष्टाः,
क्षुद्रज्योतिश्चलति महतो ज्योतिषः कर्षणेन ॥१०९॥

मग्नः पूर्वं समयनियमात् पश्चिमाब्धौ प्रदोषे,
सर्वां रात्रिं हिमजलगतः क्षीणतेजाः प्रभाते ।
देहे लग्नं सलिलनिचयं किन्नु रश्मिच्छलेन,
मुक्त्वा मुक्तामह उपचितं भानुरासः क्रमेण ॥११०॥

दृप्तेनासौ प्रचिततमसा युध्यमानश्चिरं किं,
तत्संहर्त्ताप्यतिबलरिपुक्षिप्तशस्त्रक्षताङ्गः ।
रक्तस्नातः समभवदहो स्वैः करैः प्रातरासैः,
शीघ्रं सम्मार्जितवपुरपि स्वेन रूपेण दृष्टः ॥१११॥

आदौ पूर्वक्षितिधरवरस्योत्तमाङ्गे दिनेशः,
पादं स्वीयं प्रकृतिकृपया रक्तरूपं ददानः ।
सानौ भूसंभवविटपिनामग्रभागे समुच्चे,
न्यस्य क्षौणीतलभुवि तथा भूविहारे रतोऽभूत् ॥११२॥

दीनागारे द्रविणमवतां मन्दिरे व्यक्तसारे,
वापीनीरे जलधिनिकरे पूण्यगङ्गावतारे ।
पुष्पे शष्पे गहनगहने प्रान्तरे सुप्रचारे,
विद्वद्गोष्ठ्यां क्षितिसुरपुरे हीनचण्डालवासे ॥११३॥

पूते तीर्थाम्भसि परिसरद्दुष्टगन्धप्रणाल्यां,
क्षेत्रे मार्गे नभसि धरणौ वृक्षजाते लतासु ।
तुल्यं तेजो व्यकिरदुचितं भव्यराशेः खरांशुः,
सर्वत्रैव प्रसरति सतां तुल्यरूपा प्रवृत्तिः ॥११४॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सूर्य्यास्कन्दादभजत रुषा तप्ततां तोयजातं,
तेजोदीप्तो ह्यकिरदनलं तैजसः सूर्य्यकान्तः ।
धत्ते क्रोधं परपरिभवाच्छान्तशीलोऽपि मानी,
यत्तेजस्वी स खलु तनुते तुल्यरूपं हि तेजः ॥११५॥

नाशं यातः समयनियमाद् वीतपूर्वप्रदोषे,
सूर्य्यः पूज्योऽप्यखिलजगतां प्रस्खलद्दीप्तिलक्ष्मीः ।
सोऽसौ भूयोऽप्युदयमभजत् पूज्यमानी जनौघै-,
र्नीचैरुच्चैर्विचरति तथा भूतभाग्यं क्रमेण ॥११६॥

प्रातः सूर्य्येऽनुदित उदिते साग्निका नित्यहोमं,
कृत्वा हुत्वा शिवपरतयाध्यात्मिकप्रत्यवायम् ।
श्रद्धामद्धा व्यदधत भवे कर्मकाण्डे निरूढां,
लोका भव्यप्रवणमनसः सज्जनादर्शदृष्ट्या ॥११७॥

व्यापन्मग्नं नियतिकृपया लब्धदिव्योदयं स्वं,
कान्तं कान्ताविरहदहनोत्तापतप्तैः कराग्रैः ।
सर्वाङ्गेषु प्रणयविभवादामृशन्तं समीक्ष्य,
साध्वी सद्यः प्रियविरहिणी पद्मिनी स्मेरवक्त्रा ॥११८॥

अन्ते सैषा दयितविरहस्यापतन्तं सुदूरात् ,
कान्तं दृष्ट्वा प्रणयवशगं भृङ्गसङ्गीतभङ्गैः ।
वातक्षोभाच्चलितशिरसा स्वागतं व्याहरन्ती,
पत्युः प्रीत्यै प्रथममिलनाभ्यर्थनां सम्प्रचक्रे ॥११९॥

इन्दोः कान्ता सितकुमुदिनी पद्मिनीं वैरिणीं स्वा-,
मेकाधारामपि विसदृशीं स्वामिसम्पत्प्रसन्नाम् ।
दृष्ट्वाऽदूरे दलनयनकं स्वं सनिद्रश्चकार,
दृष्टा दुःखं जनयति परं मानसे शत्रुसम्पत् ॥१२०॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सूर्य्यो नारायणवपुरधिष्ठानमिष्टं ततोऽसौ,
पत्युर्मित्रं तदुपसरणं नैव दोषाय तस्मात् ।
इत्यालोच्य स्थिरतमपदा तत्र लक्ष्मीर्विरेजे,
दूरं नागादपि सुचरिता तत्करस्पर्शभीता ॥१२१॥

इत्थम्भूतं लघुसमुदितं वीक्ष्य विप्रः सभार्यो,
नत्वा सूरं शिवकरहरिं देवता अप्यथान्याः ।
प्राप प्रातःसवनविधये वापिकामापपूर्णाम् ,
स्वच्छामच्छस्फटिकसदृशीं पद्मिनीसद्मभूताम् ॥१२२॥

इति मन्दाक्रान्तावृत्ते खण्डकाव्ये द्वितीयो विलासः ॥२॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तृतीयो विलासः

स्नात्वा विप्रो निजदयितया पूर्वसन्ध्यां ववन्दे,
सूर्य्यायार्घ्यं व्यतरदुचितं तत्परं भक्तिपूर्वम् ।
हित्वा वापीतटमथ समभ्यागतो देवगेहं,
भक्त्या वृद्धिं सपदि गतया पूजयामास विष्णुम् ॥१॥

पत्नी तस्य श्रितसमरसा विष्णुपादारविन्दे,
भक्त्यावन्ध्यं मुरहरवचश्चेतसा संस्मरन्ती ।
योग्यं पूजोपकरणगणं संयतायोजयन्ती,
पत्युः कृत्ये व्यधित सुतरामानुकूल्यं सुसाध्वी ॥२॥

विष्णोः पूजां प्रतिदिनमसावन्वतिष्ठद् द्विजेन्द्रः,
स्वप्ने तस्मादददित कृपया दर्शनं सोऽयमस्मै ।
इत्यालोच्य व्यधित बहुधा पूर्वतः सुप्रशस्ता-,
मर्चां विष्णोः फलवति विधौ वृद्धिमेति प्रवृत्तिः ॥३॥

तस्मादहः प्रभृति भगवद्विष्णुवाक्यानुसारं,
मार्कण्डेयग्रथितवचसः पाठनं सप्तशत्याः ।
सम्यक् सम्पादयितुमभितोऽन्विष्य पञ्चाप योग्यान् ,
भक्ति-श्रद्धान्नपितमनसः पाठकान् बुद्धिवृद्धान् ॥४॥

आहूत्यासौ निजदयितया सङ्गतः पूतभूमेः,
शुद्धां मृत्स्नां स्ववसतिगृहाभ्यन्तरे मध्यभागे ।
वेदीं मेध्यामकृत विततां पञ्चपीठोपयुक्ताम् ,
रम्यां चन्द्रातपपरिगतां स्तम्भदीव्यत्पताकाम् ॥५॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

आसाद्यन्तोचितविधिमतद्रव्यभाराश्च तेन,
ये देवानामपि रुचिकरा दृङ्मनःप्रीतिसाराः ।
नो वैधानां प्रतिनिधिरभूत् तत्र कश्चित् प्रवृत्तो,
मुख्यान्न्यूनः प्रतिनिधिरतः सोऽयमिष्टो न कृत्ये ॥६॥

कृष्णाष्टम्यामथ शुभतिथौ वाचनं सप्तशत्याः,
प्रारब्धं स्यादभिमतमिति प्राप दिक्षु प्रचारम् ।
ज्ञात्वा वृत्तं स्वजननिवहा भूमिदेवस्य दूराद्,
अभ्यायाताः समनुभवितुं तन्महं तस्य वासे ॥७॥

श्रद्धावन्तः स्वजननिकरा दैवशक्तौ समेता,
वासं चक्रुश्चिरमुखरितं मोदकोलाहलेन ।
वेदीशुद्धाववहितहृदो बान्धवा भूसुरस्य,
वेदीगेहादतिलघु बहिः सारयन्ति स्म बालान् ॥८॥

सम्प्राप्तायामथ शिवतिथौ तत्र पुण्ये प्रभाते,
विप्रावासे सपदि मिलिता नित्यकृत्यानि कृत्वा ।
तेजःपुञ्जा इव गुरुसमा वाचकाः सौम्यरूपा,
यानालोक्य व्यपगतमलाः प्राणिनः सम्भवन्ति ॥९॥

सम्भ्रान्तः सन्निजदयितया पूततोयेन भक्त्या,
पादप्रक्षालनमकुरुताभ्यर्थनापूर्वमेषाम् ।
पीत्वा पादोदकमपि शिरस्यप्रमादं गृहीत्वा,
पूतं विष्णोरिव समभवद् धन्यमानी स विप्रः ॥१०॥

आशीर्वादं हितशतमयं ते प्रयुज्यातितुष्टाः,
कृत्वा धर्म्यां प्रतिनतिमपि प्राविशन् वेदिगेहम् ।
पीठान्यध्यासत निजनिजान्यायतान्यास्तृतानि,
देवीपूजामपि विहितवानेषु यः सर्वमान्यः ॥११॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

घण्टाशब्दैरतिशिवमयैः शङ्खनादैरुदीर्णै-
र्योषावक्त्रोत्थितशुभरवैरुद्गतस्वस्तिवादम् ।
सिन्दूराक्तं सहकिशलयं सत्फलं छादनाढ्यं,
सङ्कल्पान्ते घटमपि पुरः स्थापयित्वाम्बुपूर्णम् ॥१२॥

सम्पूज्यादौ गणपति-शिवादित्य-शक्रादिदेवान् ,
कृत्वा काले समुचितबहुन्यासभूतादिशुद्धीः ।
ध्यात्वा चण्डीं सदुपकरणैराचितैः शक्तितुल्यं,
भक्त्यावाह्यार्च्चयदविकलं स क्रमेणासनाद्यैः ॥१३॥

अर्घ्यं दूर्वाक्षतचित-जवाबिल्वपत्रैः प्रकल्प्य,
ध्यात्वा मातुः शिर इति ददौ तद्घटस्यैव शीर्षे ।
यन्नैवेद्यं बहुविधफलाद्याहितं देवभोग्यै-
रामिक्षाद्यैरपि सुघटितं तद् ददत् प्रीतिमापत् ॥१४॥

काले चारात्रिक-विधिमधाद् धूपदीपैरथान्यैः,
पूजागेहं गहनगहनैर्धूपधूमैर्निरुद्धम् ।
शून्ये तारा इव गतिमतो नीरदस्यावकाशे,
मध्ये मध्ये प्रकटवपुषो दृष्टिमापुः प्रदीपाः ॥१५॥

वाद्यध्वानैर्भृशमुपचितैः शङ्ख-घण्टानिनादैः,
सत्सम्बाधं गगनमभवत् सर्वतः पूतवातम् ।
आनन्दाब्धौ निखिलजनताचित्ततत्त्वं न्यमज्जत् ,
सर्वे भक्त्या प्रणतशिरसः पावनारात्रिकान्ते ॥१६॥

योग्ये काले पशुबलिमदात् प्रीतये तत्र देव्याः,
स्तोत्रस्तोमं समपठदसौ होममाधात् पुरोधाः ।
अश्रुस्रोतःस्नपितहृदयो दण्डवद् भूमिलग्नो,
विप्रः साक्षादिव घटगतां देवतामीक्षते स्म ॥१७॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

एवं नानाविधविधिलसन्मातृपूजावसाने,
सम्प्रारब्धं मनसि कलितं वाचनं सप्तशत्याः ।
देवीसूक्तं श्रुतिसमुदितं रात्रिसूक्तं पठित्वा,
प्रोचे देव्याः कवचमुचितं कीलकञ्चार्गलञ्च ॥१८॥

देहस्थैर्य्यं किल परिगतः पाठकानां समाजो,
नालस्याद्यैरभजत हितच्छेदिनं गात्रभङ्गम् ।
तन्द्रामल्पामपि परिजहौ जृम्भिकां वा क्षुतं वा,
नैवात्युच्चैः समपठदसौ नातिनीचैश्च तावत् ॥१९॥

शिक्षाशास्त्रोदितविधिभृता संस्कृतोच्चारणेन,
ह्रस्वं दीर्घं प्लुतमपि यथाशास्त्रमुच्चार्य्य सर्वम् ।
मन्त्रान् यन्त्रेष्विव सुनियतान् सर्वतः स्पष्टरूपान्,
अभ्यासेन स्मृतिपटगतान् वाचयामास सौख्यात् ॥२०॥

पाठो नातित्वरितमभवत् क्वापि नैवातिमन्दं,
विश्रामो वा पदमकुरुत क्वापि नाध्यायमध्ये ।
यावत् पाठो न समभिगतस्तत्र सम्यक् समाप्तिं,
तावत् पीठं न निजमजहात् कोऽपि मोहागमेन ॥२१॥

तन्मन्त्राणां रसमनुसरन् कम्पयामास नाङ्गं,
नो वा भावाद्यभिभववशात् कोऽपि वैक्लव्यमापत् ।
एवं नित्यं सविधि पठतां सादरं शाक्तचण्डीं,
पञ्चानां वै विलयमगमद् विंशतिर्वासराणाम् ॥२२॥

श्रीश्रीचण्डीकृतकरुणया नान्तरा विघ्नपातः,
कश्चिद् भव्यं व्यघटयदमुं कल्पितं कृत्यसारम् ।
तस्मात् पूर्णे कुशलकुशलं तच्छतावृत्तिपाठे,
देव्याः पूजा पुनरपि कृता पूर्ववद् वृद्धनेत्रा ॥२३॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अन्ते सोऽयं तिलफल-युतैः संयतः पूततोयै-
स्ताम्रे पात्रे किल विनिहितैर्दक्षिणावाक्यमाख्यत् ।
विप्रो दत्त्वामितमपि यथाशक्ति सद्द्रव्यजातम् ,
तान् सन्तुष्टानकृत विहितं यैरिदं काम्यकृत्यम् ॥२४॥

पुण्ये यस्मिन्नहनि तदिदं काम्यकृत्यं समाप्तं,
संख्यातीताः क्षितिसुरगणा भोजितास्तत्र भक्त्या ।
जात्या भिन्ना अपि बहुजनास्तोषिता भोज्यदानै-
र्नो वैमुख्यं समधिगमिताः सङ्गता भिक्षवोऽपि ॥२५॥

तस्मिन् कृत्ये प्रसरति गृहे भृत्यवद् विष्णुदासः,
पित्रादिष्टं निखिलमुचितं कर्म कुर्वन्नपीष्टम् ।
कृत्ये काम्यं निजसुतमनुस्मृत्य लज्जाविनम्रः ,
कालं व्यस्मारयदिव कलिं तातभक्तोऽप्रगल्भः ॥२६॥

विद्यावृद्धोऽप्यखिलविषये तातचित्तानुसारी,
प्रातर्मातुः पितुरपि पदे शीर्षसञ्चारकारी ।
स्वल्पाभिज्ञः शिशुरिव वसन् सन्निधाने गुरूणां,
यातो नित्यं नतिमपि गतः प्रोन्नतिं विष्णुदासः ॥२७॥

वृत्ते चास्मिन् सुमहति महे विष्णुदासस्य पत्नी,
पद्मा पद्मामपि गुणगणैः संजयन्ती प्रकामम् ।
लज्जानम्रा जननयनयोरन्तरालं श्रयन्ती,
सर्वं कार्य्यं खलु कृतवती वस्तुशक्तिर्यथैव ॥२८॥

तस्मिन् पुण्ये सुखमयमहे साङ्गयोगं समाप्ते,
दूरायाताः प्रियपरिजनाः स्व-स्वगेहानि जग्मुः ।
वात्योत्पाते शममुपगते भीषणे निष्प्रकम्पं,
शब्दैः शून्यं वनमिव बभौ विप्रदासस्य गेहम् ॥२९॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पुण्या वेदी तदुदवसितात् पुण्यतोये विसृष्टा,
निर्माल्यानां ततिरपि परां भक्तिमाधाय चित्ते ।
सौरोत्तापाद्युपहृतिकृते चित्तचन्द्रातपाद्या,
मुक्ताः स्तीर्णा नभसि पुरतो लोकसङ्दीपकृत्यै ॥३०॥

पूर्वं यत्तोत्सवमयदिने प्रोज्ज्वलालोकमाला,
गेहस्यान्तर्बहिरपि बहुं व्यादधे सम्प्रकाशम् ।
तत्रैवेष्टोत्सव उपरते ध्वान्तधारा प्रदोषे,
दुःखं सौख्यात् परमिव परं स्वप्रभावं प्रतेने ॥३१॥

देवादिष्टे सुमहति विधौ वैधभावेन पूर्णे,
देवे शास्त्रे चिरमविचलप्रत्ययं सन्दधानः ।
सत्यप्यारान्निविडतिमिरे मानसात् सम्प्रसादाद्,
राकाशुभ्रा इव दश दिशो विप्रदासः स मेने ॥३२॥

गेहे तस्मिन् बहुजनसमास्कन्दनान्मुक्तिमाप्ते,
स्वप्ने भूयो द्विजनयनयोः सम्मुखं प्राप विष्णुः ।
आविर्भूयामितकरुणया स्वेन रूपोत्तमेन,
प्रीत्योत्थाप्य प्रणतशिरसं विप्रदासं जगाद ॥३३॥

आदेशो मे त्वयि फलमितो विप्र ! तुष्टोऽस्मि तस्मात्,
चण्डीस्तुत्या सुचिरकृतयाप्येष तोषं श्रितोऽस्मि ।
देवी चण्डी नहि मदितरा स्तोत्रमस्या ममैव,
रूपं ब्रह्माश्रयति बहुलं साधकानां हितार्थम् ॥३४॥

रूपातीतं नभ इव विभु ब्रह्म भागेन हीनं,
ध्यात्वा नालं भवति जनता तत् परं प्राप्तुमिष्टम् ।
तस्माद् रूपोज्ज्वलमपि परिच्छिन्नमाकल्प्य कायं,
तद् ब्रह्मैवोपकृतिमकरोद् ब्रह्मसञ्चिन्तकानाम् ॥३५॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

इच्छत्येको हृदि कलयितुं मातृभावेन देवं,
वाञ्छत्यन्योऽपि च पितृतया भिन्नभावेन चान्यः ।
स्त्रीरूपं वा न पुरुषवपुः कल्पयामास चैकम्,
नैको बन्धुर्न रिपुरपरो ब्रह्मणस्तुल्यबुद्धेः ॥३६॥

कश्चिद् भीमे कलयति रतिं कोऽपि वा सौम्य ! सौम्ये,
कृष्णे कश्चित् कनककपिशे कोऽपि कोऽप्यभ्रशुभ्रे ।
रक्ते रूपे घटयति मतिं कश्चिदिच्छा विचित्रा,
तस्मान्नानाविधमजनयद् देवताभेदमीशः ॥३७॥

धृत्वा नारायणवपुरहं कैटभाख्यं मधुञ्च,
दैत्यं हत्वा सपदि कृतवान् भीतिमुक्तं विरिञ्चिम् ।
कात्यायन्याः सुरगणमहःसम्भवं रूपमाप्त्वा,
नाशं नीत्वा महिषमसुरं देवशङ्कां व्यलुम्पम् ॥३८॥

चण्डी भूत्वा विषम-दितिजौ चण्डमुण्डौ निहत्य,
मुण्डद्वन्द्वं समुपहृतवानम्बिकायै किलाहम् ।
हुङ्कारेण न्यवधिषमहं धूम्रनेत्रं सहेलं,
शुम्भं भ्रात्रा सहितमहनं तेजसाहं स एव ॥३९॥

भूत्वा कृष्णो झटिति मिलितो गोकुले नन्दगेहे,
चित्रां लीलामकरवमहं कोमलां भीषणाञ्च ।
गत्वा चाहं तदनु मधुरां नीतवान् कंसमन्तं,
कारागारात् पितरमनयं मातरञ्चापि मुक्तिम् ॥४०॥

पारावारोपरि निजपुरीं द्वारकामप्यकार्षम्,
नीत्वा सर्वान् समहरमहं धार्त्तराष्ट्रान् सबन्धून् ।
व्याजं कृत्वाखिलयदुकुलं प्रेर्य्य च प्रेतपुर्य्यां,
स्वच्छन्देन स्वयमपि पुरा व्याधबाणेन नष्टः ॥४१॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

शक्रो भूत्वा सुरपतिरहं स्वर्गराज्यं दधामि,
पर्जन्यानामधिपतितया शस्यमद्भिः सृजामि ।
वायुर्भूत्वा नभसि नियतं तिर्य्यगेव भ्रमामि,
जीवस्यान्तः श्वसनविधिना जीवनं धारयामि ॥४२॥

अग्निर्भूत्वा प्रतिपलमहं भुक्तमन्नं पचामि,
क्षौणी भूत्वा क्षितितलगतानेष नित्यं वहामि ।
नीरं भूत्वा तृषितजनताजीवनं तर्पयामि,
तेजो भूत्वा दिशि दिशि तमः सञ्चितं नाशयामि ॥४३॥

ब्रह्मा विष्णुः शिव इति ममैवाभिधानं विभिन्नम् ,
एकः सृष्टिस्थितिलयविधीनेष संसाधयामि ।
सर्वं विश्वं भवति खलु मे विश्वरूपस्य रूपं,
तस्माच्चण्डीस्तुतिपरिकरैस्तोषणं मे न चित्रम् ॥४४॥

काले नूनं तव सुतवधूगर्भमासाद्य चाहं,
पौत्रो भूत्वा तव कुलयशः प्रोज्ज्वलं साधयेयम् ।
अंशेनास्मिन् समवतरणान्मे विभूतिर्विचित्रा,
गन्ता काचित् समुदयमितो विस्मयो येन नृणाम् ॥४५॥

व्याहृत्यैवं द्विजवरमनोह्लादिनीं वाचमीशो,
विष्णुः स्वप्ने द्विजनयनयोरन्तरं प्राप तूर्णम् ॥
सुप्तिं त्यक्त्वा तदनु तरसा सम्प्रबोध्य स्वजायां,
सर्वं वृत्तं समवददसौ विप्रदासः क्रमेण ॥४६॥

स्वप्नालोकात् परमधिगता नैव ताभ्यां प्रसुप्तिः,
स्वप्नो मिथ्या भवति परतः सुप्तिगत्येति वादः ।
शिष्टां रात्रिं विविधवचनैर्दम्पती नीतवन्तौ,
प्रातर्देवालयमुपगतौ चक्रतुस्तत्प्रणामम् ॥४७॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

स्मृत्वा स्वप्नं हरिवरमयं मोदसिन्धौ निमग्नः,
स्नात्वा तस्मिन्नहनि विदधे विष्णुपूजां द्विजन्मा ।
एका चिन्ता तदवधि तदीयान्तरे सन्निरूढ़ा,
गन्ता स्वप्नः फलमिह कदा सत्यवाचो हि देवाः ॥४८॥

एवं चिन्तां नियतमवतो मानसे गूढ़भावां,
पद्मा काले क्रियति विगते गर्भलक्ष्म प्रपेदे ।
जायावक्त्राद् यदधिगमतो विप्रदासस्य चित्ते,
ब्रह्मानन्दः पदमिव दधौ यो मुदामन्त्यसीमा ॥४९॥

काले स्वल्पे व्रजति तदिदं वृत्तमाप प्रचारं,
येनायाताः स्वजननिवहा विप्रदासस्य गेहे ।
देवं कृत्यं समुदितफलं तारमुद्घोषयन्तो,
हर्षं लोकोत्तरमनुपदं लुप्तबाधं शशंसुः ॥५०॥

भक्त्या स्मृत्वा सुरगणमथो केचिदाहुः प्रकाशं,
पुत्रः कश्चित्त्रिदशकृपया जायतां विश्वजेता ।
आहुः केचिद् गलितवयसो भव्यमात्रे सकामाः,
विघ्नो मास्तां भवतु तनयः पुत्रिका वा सभव्यम् ॥५१॥

केचिद् बालाः प्रमुदितहृदो मोदके जातकामाः,
सङ्घं बद्ध्वा जगदुरभितो विप्रदासं श्रयन्तः ।
पौत्रे जाते वितरतु भवान् मोदकान् कुक्षिपूरं,
स्वल्पैस्तोषो न खलु भवितेत्येवमेवाद्य वेत्तु ॥५२॥

कश्चिद् बालोऽवददनुपदं मोदकैः किं फलं नः,
स्वल्पं कालं स्थितिरिह भवेन्मोदकाहारतृप्तेः ।
तस्मात् सौम्यं किमपि भवता क्रीड़नं नः प्रदेयम्,
यन्नः स्थित्वा सुचिरमसमं मोदराशिं प्रदद्यात् ॥५३॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अन्यः कश्चित् सुनिपुणमतिर्बालकः प्राह तारं,
मैवं, काम्यं युगलमिह नः क्रीडनं मोदकाश्च ।
क्रीडासौख्यं न खलु भविता मोदकैः काममाप्तैः,
क्रीडावस्तुन्यपि परिगते मोदकोत्था न तृप्तिः ॥५४॥

आनन्देन प्रचितहृदयो विप्रदासस्तमेनं,
बालं बुद्धौ निपुणनिपुणं साहसेन प्रवृत्तम् ।
प्रीत्या कृष्ट्वा कृतसुमधुरालिङ्गनं साधुवादैः,
प्राह व्यक्तं तदिदमुभयं वत्स ! दास्याम्यहं वः ॥५५॥

सङ्घीभूताः सकलशिशवो मोदकोलाहलेन,
त्यक्त्वा हास्योल्लसितवदनं विप्रदासं क्षणेन ।
जग्मुर्गेहान्तिकगतवहिःप्राङ्गणं नृत्यमग्नाः,
स्वेष्टप्राप्तौ हृदयचलनं बाह्यनृत्यं प्रसूते ॥५६॥

विष्णोः पूजादिषु रतिमतस्तस्य नित्यं द्विजस्य,
वृद्धिं लेभे रतिरतितरां तत्फलालोकनेन ।
धेन्वां क्षीरं मधुरमधुरं लुप्तबाधं ददत्यां,
दृष्टार्थायां किल गृहपतेरादरो याति वृद्धिम् ॥५७॥

यावद् गर्भं किल धृतवती लक्षणं तस्य तावत्,
पद्मादेहे प्रकटमभवद् देहमध्येऽपि तस्याः ।
सैषा मृत्स्नाशयनशयिता प्रीतिधारां प्रपेदे,
गात्रं तस्या वमनविधये प्रोन्मुखं नित्यमाभात् ॥५८॥

कर्मालस्यं क्रमश उचितं विग्रहे गर्भवत्याः,
स्वल्पं स्वल्पं पदमथ दधौ लज्जिता येन पद्मा ।
लज्जावेशात् सदपि किल तत् सा समाच्छाद्य यत्नात्,
पूर्व्वाभ्यासानुमतविधये प्रेरयामास कायम् ॥५९॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अन्ने नष्टा रुचिरतितरां प्रीतिरम्लेषु जाता,
नेत्राधस्तात् पदमकुरुत श्यामिका पाण्डुताङ्गे ।
तत्तल्लिङ्गादनुमितनवोपात्तगर्भा तदानीं,
पद्मा सर्वैः स्वजननिवहैः सेविता सावधानम् ॥६०॥

तस्या गर्भोदयदिवसतो मासि जाते तृतीये,
पद्मायाः पुंसवनविधिना विप्रदासेन यत्नात् ।
पुण्ये काले समुचिततया संस्कृतः पुण्यगर्भो,
यस्मात् पुत्रं बहुगुणयुतं सम्प्रसूते प्रसूतिः ॥६१॥

तद्वत् पद्मामृतविधिरभूत् पञ्चमे मासि तस्या,
स्तत्सीमन्तोन्नयनमभवत् षष्ठमासे प्रपन्ने ।
एवं नानाविधविधिसमादिष्टसंस्कारयोगाद्,
गर्भः पूतो हितसमुचितो भाविकाले बभूव ॥६२॥

देहस्तस्याः क्रमसमुदितं गौरवं सम्प्रपेदे,
काले काले रुचिमनुगतैर्दोहदैस्तोषिता सा ।
तस्या धर्म्यैर्विविधचरितैः सत्पुराणादिभिश्च,
प्रायः कालः कुशलजननैः श्रूयमाणैस्तदागात् ॥६३॥

आमिक्षाद्यैर्दधिमधुघृतैः क्षीरसारैरथान्यैः,
पुष्ट्याधाने चिरपरिचितैः सेव्यमाना तदासौ ।
पुष्टिं यद्वत् स्वयमधिगता तद्वदेवाप गर्भो-,
मात्रा भुक्तं वितरति रसं तुल्यरूपं हि गर्भे ॥६४॥

गर्भावस्थामुपगतवती दीनदीना किलाम्बा,
भोगाभावाज्जनयति निजापत्यमुत्कर्षशून्यम् ।
भोगादीना गुणगणयुतं तोकरत्नं प्रसूते,
हेतुं हित्वा न खलु घटते कार्यसिद्धिः कदाचित् ॥६५॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

मूले सिक्ता समुचितजलैर्मृत्तिकाभिश्च बद्धा,
वल्ली काले वितरति फलं पुष्टमुत्कृष्टरूपम् ।
देहं धत्ते स्वयमपि परं स्निग्धपुष्टं विशिष्टं,
रीतिः सैव प्रसरति भवे पूर्णरूपा प्रसूतेः ॥६६॥

गर्भस्याप्ते तदनु दशमे मासि विप्रः सुशीघ्रं,
स्वीयावासे स समघटयत् सूतिकागारमेकम् ।
यत्र क्षेमोपकरणचयाः सर्व एवोपनम्रा,
विघ्नान् बालादिषु विरचितान् घ्नन्ति बालग्रहाद्यैः ॥६७॥

मत्वा वध्वाः प्रसवमचिरेणैव सम्पत्स्यमानं,
धात्रीमाकारयदधिगुणां विप्रदासस्य जाया ।
सैषा धूमादिव हुतवहं तत्र सुव्यक्तलिङ्गात्,
तस्याः पुत्रप्रसवमचिराद् भाविनं साधु जज्ञौ ॥६८॥

नीता पद्मा तदनु नचिरात् सूतिकागेहमध्यं,
धात्री दक्षा सदुपकरणा तत्र शीघ्रं प्रविष्टा ।
मुग्धा पद्मा प्रसवनविधिध्यानभीतावतस्थे,
धात्रीवाचा कथमपि गता स्थैर्य्यमाद्यप्रसूतिः ॥६९॥

पद्मा नागात् सवसमुचितां वेदनां लेशतोऽपि,
यस्मात् सद्यः प्रसवविषये शङ्कितास्तत्र लोकाः ।
धात्री दाक्ष्यादुपगतदृढप्रत्ययासीत् सुनद्धा,
नान्यो रोगं स्पृशति खलु यं वेत्ति तं प्राज्ञवैद्यः ॥७०॥

स्वल्पात् कालात् परमतितरां सप्रकाशासु दिक्षु,
प्राचीमूले कमलदयिते व्यक्तसिन्दूररागे ।
देवागारेष्वपि समुदिते शङ्ख-घण्टादिनादे,
वापीतीर्थे द्विजगणमुखादुत्थिते श्रौतमन्त्रे ॥७१॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

मेघैर्मुक्ते जलधिजलवन्नीलभूतान्तरीक्षे,
मन्दं वाते प्रवहति सुखे सूनगन्धं दधाने ।
नैवात्युष्णे न च हिमजड़े लोककाम्यप्रवाहे,
विप्रावासे स्वजननिवहे साग्रहापेक्षमाणे ॥७२॥

पुण्ये लग्ने ग्रहपिशुनिताशेषभव्ये प्रभाते,
गौरी षाण्मातुरमिव शची वा जयन्तं जयन्तं ।
तारा पुत्रं कचमिव सुराचार्यपत्नी सुयोग्यं,
पद्मा पुत्रं कमपि सुषुवे क्लेशलेशं विनैव ॥७३॥

बालो गर्भाद् भुवमुपगतो यावदुच्चै रुरोद,
तावच्छ्रुत्वा सुतसमुचितं मांसलं कण्ठनादम् ।
जातः पुत्रो ध्रुवमिति विनिश्चिस्य सर्वे गृहस्थाः,
सम्मोदाब्धौ व्रुड़ितमनसो मोदनादं प्रचक्रुः ॥७४॥

धात्रीवाचा तदनु सुदृढं निश्चयं प्राप्तवन्तो,
वृद्धा देवान् प्रणतशिरसो भक्तिपूर्वं स्मरन्तः ।
दीर्घायुष्ट्वं नवभवशिशोः प्रार्थयन्तादरेण,
हृष्टस्वान्ताः शिशुयुवजना मोदकान् विप्रदासम् ॥७५॥

सप्तावृत्ति प्रकटितमहोल्लासमुच्चै रमण्य,
ऊलूशब्दं गगनपथगं चक्रुरत्यादरेण ।
शङ्खं तद्वद् वदनजनिना मारुतेनाभिपूर्य्य,
चक्रुर्दूरं मुखरमचिरादन्तरीक्षं समीरम् ॥७६॥

वर्षानीरोच्छ्वसिततुलितानन्दधारा तदानीं,
सर्वं पर्य्याप्लुतमकुरुतामुष्य विप्रस्य गेहम् ।
पद्मादेव्या वयसि बहुले पुत्रसूतिं विदित्वा
पल्ली सर्वा सममुपगता चेतसः सम्प्रसादम् ॥७६क॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

नक्षत्रेशादपि समधिकह्लादनं सूनकम्रं
दिव्यज्योतिःस्फुरितवपुषं देवतानन्दनाभम् ।
दृष्ट्वा पौत्रं निजवनितया सार्द्धमस्तौत् स सार्द्धं,
स्वीयात्मानं सुखजनयनासारधारां विमुञ्चन् ॥७७॥

नात्यासन्नोऽप्यतिसुखयुतो लज्जया विष्णुदासः
पित्रादेशात् सविनयमवालोक्य पुत्रास्यचन्द्रम् ।
वैधस्नानाद् वहिरिव मलादन्तरेऽप्याप मुक्तिं,
पुत्रामानं तरति निरयं पैतृकर्णश्च पुत्री ॥७८॥

पद्मा सद्यो द्युतिजितलसत्पूर्णशुभ्रांशुविम्वं,
लावण्यानामिव घनचयं वालवृन्दारकाभम् ।
प्राणारामं प्रियमनुपमं पुण्डरीकाभनेत्रं
दृष्ट्वा पुत्रं त्रिदिवभवनानन्दधारां दधार ॥७९॥

अङ्गीतक्षेपं रचयति शिशुर्लानिरस्यां विलुप्ता,
वालस्यास्ये स्मितमधिगतं मानसं सैल्यमस्याः ।
बालोऽक्रोड़त् किल सुखमयीं वृत्तिमेषाप चित्ते,
वाष्पस्रोतः शिशुनयनयोर्मार्जितस्तत्प्रसादः ॥८०॥

हर्षोत्सेकाद् युवशिशुगणास्कन्दनाच्चाविलम्वं,
विप्रः प्रादान्मधुरमधुरान् मोदकानागतेभ्यः ।
वाह्याः सर्वे मुदितमनसो मोदकान् प्राप्य जग्मु-
र्गेहस्थानामपि समतनोन्मोदकाद्यैः स तोषम् ॥८१॥

विप्रः स्नेहाद् विपुलविपुलं स प्रवन्धं विधाय,
काले काले व्यधित सकलां संस्कृतिं बालकस्य ।
तस्मादह्नः परिगणनया द्वादशाहे सुतस्य
श्यामादासेत्यतिशिवमयं नाम तातः प्रचक्रे ॥८२॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्यामादेव्याः किल करुणया जातवानेष बालः,
श्यामादासेस्यनुमतमतस्तस्य नाम स्ववर्गैः ।
प्राच्याचारप्रवणमनसां सज्जनानां समेषां
प्रायो नामप्रणयनविधौ तादृशी भाति रीतिः ॥८२॥

तस्य प्राप्ते वयसि विहिते पञ्चमाब्दे क्रमेण,
विद्यारम्भः समजनि नवं जीवनं येन जातम् ।
बुद्ध्युत्कर्षात् स खलु दिवसैः स्वल्पकैराद्यविद्यां,
पूर्णां चक्रे तदुपनयनं प्राप्तकालं ततोऽभूत् ॥८३॥

जातस्तस्योपनयनविधिर्वैधगर्भाष्टमाब्दे,
स्वाचाराद् द्वादश च दिवसान् ब्रह्मचर्य्यं स भेजे ।
हित्वा मध्वादिकमलवणं भोज्यमश्नन् हविष्यं,
शिश्ये कष्टं कुशचयमये स्वस्तरे निर्विलासः ॥८४॥

पादात् केशान्तिकपरिमितं सौम्यमग्न्याद्यदुष्टं,
त्वक्संवीतं सरलवपुषं विव्रणं भीत्यनर्हम् ।
सोऽयं विप्रोचितमभिहितं वैल्वदण्डं दधार,
मौञ्जीं श्लक्ष्णां त्रिगुणरचितामाददे मेखलाञ्च ॥८५॥

वामस्कन्धोपरि विनिहितं दक्षहस्तादधस्तात् ,
कृत्वा लम्बं नवगुणमयं पुण्ययज्ञोपवीतम् ।
धृत्वा कृष्णाजिनमभिहितं पावनञ्चोत्तरीयम् ,
सन्ध्यां वन्द्यामुभयसमये वन्दमानः स तस्थौ ॥८६॥

तस्मिन् काले न खलु विहितं किञ्च शास्त्रे निषिद्धं,
भिक्षां कृत्वा विधिसमुचितां जीविका तेन लब्धा ।
नित्यं चक्रे श्रुतिगुरुपदाभ्यर्च्चनं भक्तिपूर्वं,
गीतः सन्ध्याचरणसमये वेदमन्त्रः स्वरेण ॥८७॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

यावन्मुण्डं कचविरहितं गैरिकश्चापि वासो,
वैल्वं दण्डं दधदपि नयाद् वैधभिक्षां ययाचे ।
तावद् बालो वलिमुपगतो वामनो वा बभासे,
दृष्ट्वा माता यतिमिव च तं भीतभीता बभूव ॥८८॥

गायत्री तच्छ्रुतिपथगता यावदन्तः प्रविष्टा,
तावत् पापं विलयमगमद् ब्रह्मतेजश्चकाशे ।
वेदस्पर्शात् स्वयमपि शिशुः स्वं विवेदातिपूतं,
तीर्थस्नानादिव गृहपतिः प्रत्ययी स्मार्त्तधर्मे ॥८९॥

केशव्याजाच्छिरसि विधृतः किं पुरा पापराशिः,
काले तस्य व्यपगमवशान्निर्मलोऽसौ दिदीपे ।
तत्सर्वाङ्गावरणवशतो वाससा गैरिकेण,
भातो दिव्याचरणविधिना वह्निमेष प्रविष्टः ॥९०॥

अन्ते पुण्योपनयनविधेः स्वल्पकाले व्यतीते,
शिक्षाहेतोः समजनि शिशोर्विप्रदासस्य चिन्ता ।
पूर्वां शिक्षां शिशुरधिगतः प्राप्तकालोत्तराद्य,
साप्यन्यस्मिन् क्वचन न भवेद् दूरदेशे सुखाय ॥९१॥

यं प्राणेभ्यः प्रियतममभुं नो निमेषं कदाचित्,
सोढुं शक्तः क्वचिदहमितं ब्राह्मणी चातिमुग्धा ।
क्रीडाव्याजादपि सखिगणैः सञ्चरन्तं प्रशान्तं,
तस्यान्यस्मिन् सुचिरवसतिः शिक्षणार्थेत्यसह्यम् ॥९२॥

गेहे तस्मादिह शिशुरसौ शिक्षतां विष्णुदासात्,
सोऽयं ज्ञाने सुरगुरुसमः सर्वतन्त्रस्वतन्त्रः ।
स्वल्पानिष्टं कथमपि जनैः शक्यमिष्टाय सोढुं,
शक्यं सोढुं न तु विरहजं तस्य दुःखं मयोग्रम् ॥९३॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

इत्थं ध्यायन् स्वसुतमवदद् विप्रदासः कदाचित्,
वत्स ! प्राप्ता तव तनुजनेः सम्यगेवाद्यशिक्षा ।
प्राप्तश्चाद्योन्नतिसमुचितप्रष्ठविज्ञानकालः,
किन्तु क्षेमायुषममुमहं नो सहे दूरसंस्थम् ॥९४॥

माताप्येनं तव नयनयोरन्तराले वसन्तं,
नालं सोढुं क्षणमपि ततः प्रष्ठविज्ञानहेतोः ।
दीर्घं कालं पठनविधये मास्तु दूरेऽस्य वासो,
गेहे स्थित्वा तव वरगुरोरेष शिष्यत्वमेतु ॥९५॥

प्राज्ञो जातस्त्वमसि विविधं शास्त्रतत्त्वं गृहीत्वा,
संख्यातीताः प्रतिदिनमथो त्वां सुशिष्याः श्रयन्ते ।
कीर्त्या व्याप्तास्तव दश दिशः शुभ्रभानुं जयन्त्या,
गेहे रत्ने मिलति सुधियां का नु रत्नार्थमीहा ॥९६॥

तस्मात् पुण्ये क्वचन दिवसे स्वायुषं भ्रातरं मे,
कातन्त्रव्याकरणमसमं प्रारभस्वोपदेष्टुम् ।
तस्माज् जाते सति पदविभक्त्यादिसंस्कारबोधे,
काव्ये शिक्षां घटय परमां तत्परं तर्कशास्त्रे ॥९७॥

श्रुत्वा तातोदितमिति वचः सुप्रसन्नोऽपि चित्ते,
पुत्रस्नेहं निविड़निविड़ं स्वस्य निह्नोतुकामः ।
सामप्रायं वचनमतनोद् विष्णुदासो विनीत-,
स्तादृग्भूतो जगति नियतः सत्पाणां स्वभावः ॥९८॥

तात ! क्षेमायुषि शिशुजने तत्र सुस्नेहवृत्तिं,
जानाम्येव प्रकृतिसुलभां मातुराद्यस्य चापि ।
एवं सत्यप्यहमनुमतिं प्रार्थये किञ्च वक्तुं,
बुद्धया लब्धं यदि न कथयाम्येष दोषी ततः स्याम् ॥९९॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तातः प्राह प्रकटय निजं मानसं निर्विकल्पं,
तापं चित्त जनयतितरां वक्तुमिष्टं ह्यनुक्तम् ।
वृद्धे बाह्येन्द्रियमिव भवत्यन्तरं क्षीणशक्ति,
स्याद् वा ध्यानं मम मलचितं वृद्धभावं गतस्य ॥१००॥

अन्यच्चासौ त्वमसि तरुणो मित्रतुल्योऽद्य वत्स !
तारुण्याप्ते स्वजननिवहे मित्रभावोऽनुशिष्टः ।
यस्मिन् गेहे गृहपतिजनः स्वीयबन्धूनुपेक्ष्य,
स्वातन्त्र्येणाचरति तदिदं शान्तिशून्यं न धन्यम् ॥१०१॥

पृष्टा माता तव शुभमयी शुद्धबुद्धिः स्नुषापि,
ताभ्यां प्रीत्या मम किल मतं सुप्रशस्तं गृहीतम् ।
सम्प्रत्याप्ता यदि मम मते स्वीकृतिस्तावकीना,
स्वीयामिच्छां फलपरिगतां कर्तुमीशे तदैव ॥१०२॥

श्रुत्वा वाचं पितुरकथयद् विष्णुदासोऽपि भूय-,
स्तातस्येच्छा निरवधिबला सर्वकृत्येषु गेहे ।
तद्व्यत्यासो न भवितुमलं वाञ्छयान्यस्य तात !
स्वीया चिन्ता तदपि चरणे न्यस्यते वीक्षणार्थम् ॥१०३॥

यत् सर्वेषां मतमिह हितं तन्न मे भाति भव्यं,
गेहे शिक्षा न हि शुभकरी जायते बालकानाम् ।
पाठं तेषां गमयति लयं लालना स्नेहमूला,
बाल्ये यासौ शिशुपरिचिता सन्निधाने गुरूणाम् ॥१०४॥

औदासीन्ये प्रसरति शिशोः शिक्षणे शिक्षका ये,
दण्डो देयः शिशुहितकृते तैरवश्यं हि तस्मै ।
पित्राद्याः स्युर्यदि गुरुपदे तर्हि ते स्नेहमुग्धा-,
स्तस्मै दण्डं किल वितरितुं नैव शक्ता भवेयुः ॥१०५॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

बाल्याभ्यासात् परिचितसुहृत्सङ्गसङ्गानुषङ्गात् ,
काले काले भवति भवने पाठविघ्नः शिशूनाम् ।
दृष्ट्वाप्येवं नहि गुरुजनास्तत्प्रतीकारशक्ताः,
शिक्षोत्कर्षं रहयति गुरुस्नेहधारा शिशूनाम् ॥१०६॥

कुर्वन्तोऽपि प्रणिहितहृदा बालकाः पाठकृत्यं,
संस्मृत्य स्वांस्तदुपगमनाद् यान्ति विक्षेपदोषम् ।
आत्मीयैर्वा विधिशतकृतेऽनेकवारांश्च हूता,
हित्वा पाठं पठनसमयेऽनिष्टमासादयन्ति ॥१०७॥

पाठाज्जातं श्रममपि लघुं कष्टहेतुं विदन्तः,
स्नेहाधीनाः प्रियपरिजनास्तन्निवृत्तिं दिशन्तः ।
सद्बालानामपि निजगृहे पाठकृत्ये रतानां,
भूयो भूयः प्रकटितदयं पाठविघ्नं चरन्ति ॥१०८।

गेहे नानाविधगृहगताचारसंस्पर्शहेतो-,
र्विक्षिप्तानां मनसि सुतरामिष्टनाशः शिशूनाम् ।
सोऽयं शक्यो न हि शिशुगणैर्यत्नतोऽपि प्रहातुं,
नीरे मग्नैरिव निजवपुर्वारिसंस्पर्शजाड्यम् ॥१०९॥

तस्मान्मन्ये नहि समुचितामत्र शिक्षाव्यवस्थां,
बालस्यास्य स्वभवनपदे भाविनो दोषराशेः ।
अन्यत्रायं क्वचिदधिगुणज्ञानभूमौ विशङ्कं,
प्रेष्यः प्रेष्यः प्रचितकुशलप्राप्तये नान्यथेष्टम् ॥११०॥

एवं श्रुत्वा तनयवचनं युक्तिमद् विप्रदासः,
पूर्वं चित्ते दृढमपि कृतं निश्चयं पर्य्यहार्षीत् ।
अन्तर्गेहं तदनु मिलितो भार्य्यया पद्मया च,
सर्वां युक्तिं तनयकथितां प्रोक्तवान् सान्त्वपूर्वम् ॥१११॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तस्माद्ध्वं त्रिचतुरदिनेष्वेष यातेषु विप्रः,
श्यामादासं सकलविदिते क्वापि विद्यानिवासे ।
विद्याभूत्यै तनयतनयस्नेहमुग्धोऽपि यत्नात्,
विख्याते विक्रमपुरपदे वर्त्तयामास गत्वा ॥११२॥

लब्ध्वा बालं सुरसुतसमं दिव्यलावण्यरम्यं,
दीव्यन्नेत्रद्युतिभिरसमां बुद्धिमावेदयन्तम् ।
स्नेहं पुत्रे निज इव गतः शिक्षकस्तत्र दक्षो,
रूपं चेतो हरति खरधीसाधनं धीधनानाम् ॥११३॥

पत्नी तस्यापरिमितगुणा नष्टपुत्रा पुरस्तात्,
तं स्वं जन्मान्तरमुपगतं पुत्रमेवाभिमेने ।
श्यामादासोऽप्यतिमृदुमनास्तद्द्वयोर्भावदर्शी,
मातापित्रोर्विरहजनितं संविसस्मार दुःखम् ॥११४॥

स्थित्वा तत्र त्रिचतुरदिनान्यात्मपौत्रानुरोधाद्,
यावद् विप्रः स्वभवनमुखं गन्तुमाप प्रबन्धम् ।
तावद्धैमन्तिकसरसिजप्रान्तनीहारधारां,
जित्वा नेत्रस्तुतजललवा बालवक्त्रोऽभ्यषिञ्चन् ॥११५॥

श्यामादासं सजलनयनं वीक्षमाणस्तदानीं,
यद्यप्यापन्मनसि विषमं दुःखमक्षीणसत्त्वः ।
तस्य स्थैर्य्यं घटयितुमसौ विप्रदासस्तथापि,
चैत्तं दुःखं कथमपि बहिर्न प्रकाशं निनाय ॥११६॥

नानाकारैर्वचननिकरैः सान्त्वयित्वा तमेनं,
तद्दम्पत्योः करतलयुगे रत्नवन्न्यस्य विप्रः ।
देशोद्देशं कथमपि पुरः कायमात्रेण गच्छन्,
श्यामादासं क्षणमपि हृदो नैव दूरे चकार ॥११७॥

इति मन्दाक्रान्तावृत्तखण्डकाव्ये तृतीयविलासः समाप्तः ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

चतुर्थो विलासः

श्यामादासः स्वजननिवहाद् दूरदेशं गतोऽपि,
कर्त्तव्यं स्वं गुरुतरमभिध्याय धैर्य्यं प्रपेदे ।
श्रीसम्पत्त्या गुरुगृहमपि स्वान्तमस्याचकर्ष,
नानादेशागत-बहुसहाध्यायिनाञ्चाधिगत्या ॥१॥

यस्मिन् रम्यास्तृणमयगृहा वेणुवृत्यावृतान्ता,
दारुस्तम्भैरुपरि विधृता विस्तृतालिन्दयुक्ताः ।
यत्र द्वारं प्रतिगृहमभूद् दारुशिल्पैरनल्पैः,
प्राणारामं तलमपि समं मृत्तिकाकुट्टिमानाम् ॥२॥

अन्तर्वाटो नहि बहुगृहा बाह्यवाटी विशाला,
यस्यां वासं व्यदधत समे शिष्यवर्गा मिलित्वा ।
सैषा शोभामभजत पथः पार्श्वयुग्मं श्रयद्भिः,
श्रेणीबद्धैस्तरुणमसृणैः पादपैर्नारिकेलैः ॥३॥

ये सुश्यामा रसवहफलैरन्वहं सेव्यमाना-,
स्तृष्णां छित्वा सुमधुररसैस्तर्पयन्तस्तृषार्त्तान् ।
सौरोत्तापं शिरसि दधतोऽप्यात्मनां साधुवृत्तेः,
शाखोत्क्षेपं स्वमिव परमानन्दमाराद् वितेनुः ॥४॥

तेषां पश्चादपि विनिहितः पूगवृक्षप्रतानः,
किं स्वं कार्श्यं व्यधित तपसा येन दूरोर्द्ध्वमाप्तः ।
जित्वा नानागुणसुविदितं पादपं नारिकेलं,
नित्यं लोकोपकृतिसुभगं रत्नभूतं द्रुमाणाम् ॥५॥

स्निग्धश्यामा गहनगहनाः श्यामलैः पर्णभारैः,
पश्चात्तेषां पदमधिगताः श्रेणिबद्धा रसालाः ।
तत्त्वज्ञानादिव शिवमयाद् योग्यकाले हि येभ्यो,
जातं जीवान् सदमृतफलं लब्धकामान् विधत्ते ॥६॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

यस्या देहान्निजवपुरभूद् या स्ववक्षोरसेन,
स्वीयैरंशैरपि च वपुषः पुष्टिमिष्टां व्यधत्त ।
तस्या धात्र्या रविकरजनिं क्लेशमेते लुनन्तः,
सत्पुत्राणां चरितमुचितं संश्रयन्ते रसालाः ॥७॥

नानावृक्षाः सफलवपुषस्तत्र भान्ति स्म हृद्याः,
स्वाम्यं येषु प्रचितमभवत् कुर्वतां शास्त्रशिक्षाम् ।
स्नेहं मातापितृनयनयोर्दूरतः संस्थितेषु,
तेषु प्राप्ताः प्रचुरफलदाः किन्नु काले त एते ॥८॥

नानापुष्पद्रुम-सकुसुमस्निग्धवल्लीसमृद्धं,
पार्श्वे पश्चादभिमुखमपि प्राप्तदूरप्रसारम् ।
प्रान्ते विल्वद्रुमपरिवृतं मारुताधूतकायं,
पुष्पोद्यानं प्रचिततुलसीकाननं तत्र रेजे ॥९॥

तारं सूर्य्योदयसमयतः शास्त्रपाठे रतानां,
श्रावं श्रावं त्रुटिविरहितं पाठकृत्यं वटूनाम् ।
पुष्पोद्याने कुसुमलतिकाः पुष्पवृक्षाश्च हृष्टाः,
पुष्पव्याजात् प्रमदजनितं हासमाराद् वितेनुः ॥१०॥

पुष्पोद्यानाद् दिशि दिशि परः पुष्पगन्धः प्रकीर्णः,
प्रातर्वातं व्यधित सुरभिं लोकचित्तञ्च हृष्टम् ।
पुष्पे गन्धः सजति समवायेन सिद्धं किलेदं,
सोऽयं हित्वा तदपरगतो जात इत्यत्र चित्रम् ॥११॥

वाणीनाथो गुरुरिव गुरुस्तर्करत्नोपनामा,
प्रातः सुप्तानलसवपुषः सोढ़वान् नो कथञ्चित्
सूर्य्यस्तस्मादुदयमुपयन्नैव कश्चित् प्रभाते,
तत्रापश्यद् व्यसनवशतः स्वीयतल्पे प्रसुप्तम् ॥१२॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तत्रादूरे गुरुपरिसरा संस्थिता कापि वापी,
नीरं यस्याः स्फटिकसदृशं निर्मलं शर्मबीजम् ।
यस्योत्कर्षान्मुदितमनसो दूरसंस्था मरालाः,
सङ्गच्छन्ते सखिगणवृतास्तत्र कामं विहर्त्तुम् ॥१३॥

अह्न्यम्भोजं दिनकरकरैर्यत्र भेजे प्रकाशं,
रात्रौ तद्वत् कुमुदमहसच्छुभ्रभानोः प्रभाभिः ।
तद्व्यत्यासो न भवति जड़ेऽप्यत्र युग्मे कदाचिद्,
वस्तून्यात्माचरणविषये यन्त्रितानि प्रकृत्या ॥१४॥

सूर्य्यप्रेम्णा मुदितमुदिता पद्मिनी फुल्लकान्ति-
र्यस्यां कर्णेजपमलिचयं मन्दवातेन धूता ।
वारं वारं मलिनमभितः सञ्चरन्तं सकामं,
दूरीचक्रे विटमिव सती स्वं शिरश्चालयित्वा ॥१५॥

अंशे नीलोत्पलरुचिमती क्वापि रक्ताब्जरम्या,
शुभ्रा क्वापि प्रचितधवलाम्भोजवृन्दैरनिन्द्यैः ।
नानावर्णावयवघटिता वापिका सा विचित्रा,
चित्राकारा हृदयमहरत् प्रेक्षकाणां स्वकान्त्या ॥१६॥

नीरोपान्ते तटभुवि नवश्यामदूर्वाप्रतानः,
श्यामाभप्रच्छदपट इवाध्यासनार्थं प्रकीर्णः ।
यत्रासीना रसिकवटवो रम्यवेलावसाने,
प्रीत्यान्योन्यं लपननिरता वायुसेवामकुर्वन् ॥१७॥

यावद् वापीगतजलतलं बद्धसोपानपंक्तिः,
सिन्नासूनां जलवतरणेऽसूत सौकर्य्यसीमाम् ।
प्रातः सायं वटुपरिषदाध्यासिता सातिपूता,
सन्ध्यामन्त्रैर्मुखरमुखरा पावयामास वातम् ॥१८॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitized by eGangotri/Sarayu Trust

तीरे रूढ़ाः समुचितफलाः पादपा भिन्नरूपा-
श्छायाभूतं निज-निजवपुः संक्रमय्याच्छनीरे ।
सौभर्य्याद्या इव निजफलत्यागशक्त्या महत्या,
कायव्यूहाश्रयणपटवो भूतिमाप्ता व्यभासुः ॥१९॥

वापी तीराश्रिततरुलतागुल्मकादिप्ररोहान्,
सान्निध्येन प्रतिपलमसौ स्वं रसं पाययित्वा ।
स्निग्धान् जुष्टानकुरुत यथासम्भवं सत्फलाद्यैः,
स्नेहो भूयान् प्रसरति सतां सन्निधाने स्थितेषु ॥२०॥

वापीनीरे बहुनिखननाज्जातपूर्वे गभीरे,
मीनाः पीना गतिमुपगताश्छन्दतः सर्वकालम् ।
क्षिप्त्वा तस्मिन् वड़िशमशनैरन्वितं केऽपि दक्षा,
वक्त्रे विद्ध्वा सहविलसितं तीरमानिन्युरेकान् ॥२१॥

क्षिप्तैर्जालैरपि कतिपये मीनकोल्लासदृष्ट्या,
बद्ध्वा मीनांस्तटमभि समाकृष्य संलग्नरज्ज्वा ।
तीरं नीत्वावहितमनसो मोचयित्वा च जालात्,
फुल्लस्वान्ता निज-निजगृहान् प्रापयन्ति स्म लोलान् ॥२२॥

यावज्जालाद् भुवि निपतिताः क्षुद्रमीना धरण्यां,
क्षुद्रत्वाद् ये किल जनतयोपेक्षितास्तत्र लोभात् ।
मार्जाराणामिह समुदयो वायसानाञ्च जात-
स्तेऽप्यन्योन्यं कलहनिरताः स्वार्थलाभे सकामाः ॥२३॥

तत्रायाता यदि विधिवशादामिषात् सन्निवृत्ता,
नासां रुद्ध्वाङ्गुलिभिरचिरं ते तदा दूरमाप्ताः ।
दृष्ट्वा मीनप्रियजनगणास्तांस्तथा दूरयातान्,
तद्वैराग्याश्रितमतितरां कौतुकं सम्प्रचक्रुः ॥२४॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अन्यच्चित्रं किमपि ददृशे तत्र यद् विप्लवार्थं,
मध्ये मध्ये तरुषु मिलिता वानराः श्रेणिबद्धाः ।
पक्वापक्वान्यखिलतरुगान्याहरन्तः फलानि,
लोकोत्पातं व्यदधत नरान्नाधरा बुद्धिवृत्त्या ॥२५॥

गेहेऽप्यस्मिन् न हि लघुतरो वानराणां प्रभावो,
धान्यादीनां क्षतिमगणितां यत् प्रविश्याचरन्ति ।
यावत्तेषामशुभमिलनं तावदेवावधानैः,
सर्वं रक्ष्यं गृहगतजनैस्तान् निवर्त्यातिदुष्टान् ॥२६॥

वृक्षाग्रेषु भ्रमणनिरता वानरा यावदेकं,
वृक्षं त्यक्त्वोत्प्लवनविधिना वृक्षमन्यं दविष्ठम् ।
देहे बद्ध्वा परिकरममी संश्रयन्ति स्म यत्नात् ,
तावत् कस्यान्तरमतितरां कौतुकं नैव भेजे ॥२७॥

तस्मिन् काले क्वचन निपुणः शावको वानरस्य,
वक्षोलग्नः कथमपि न वाभ्रश्यदित्यप्यपूर्वम् ।
सर्वाश्चर्यं भृशमजनयद् दृश्यमानं तदेतद् ,
एकत्रासौ पशुरिति परत्रापि यच्छावकोऽसौ ॥२८॥

नीरक्रीडापि च सुमधुरा प्रीतये वानराणां,
ये वृक्षाग्राज्जलमभि नतात् कौतुकेनोत्पतन्तः ।
भूयो भूयः प्रपतनसमुत्थानकृत्ये चरन्तः,
स्वान्ते मोदं किल जनिभृतां कश्चिदारादकुर्वन् ॥२९॥

इत्थम्भूते गुरुगृहगते मोदहेतुप्रपञ्चे,
श्यामादासो मनसि सुतरां प्रीतिधारां दधार ।
येनात्मीयस्मरणजनितं नैव दुःखं समृद्धं,
नित्यं तस्याध्ययनविषये विघ्नलेशं व्यतानीत् ॥३०॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

शय्योत्थायं प्रतिदिनमसौ नातिभाते प्रभाते,
नित्यं कृत्यं निखिलमकरोदाह्निकं सुप्रयत्नात् ।
पाठे तस्मात् परमवहितो व्यापृतोऽभूत् सुवृत्तः,
स्वाध्यायान्ते गुरुपदयुगाभ्यर्णसञ्चारकालः ॥३१॥

प्रातः स्नातो विधिमनुगतो नित्य-कृत्यानि कृत्वा,
पुण्यश्रीकः शिव इव गुरुर्ज्ञानदाता वटुभ्यः ।
वाणीनाथो बहुवटुवृतं स्वीयविद्यानिकेतम् ,
आमाद्यैवारभत नियमात् पाठनां तत्र तेषाम् ॥३२॥

नत्वा पादौ शिवसमगुरोराज्ञया तस्य हृष्टः,
श्यामादासोऽध्ययननिरतो यावदासीत् सुबुद्धिः ।
तावत्तस्यानुपमधिषणायोगमन्वीक्षमाणो,
वाणीनाथस्तमभि हृदयेऽधत्त नानाविचारान् ॥३३॥

देवः कश्चित् किमु मम गृहे शिष्यभूयं प्रपन्नः,
किं वा कश्चिन्मुनिरुपगतः शास्त्रसंस्कारयुक्तः ।
किं वा कश्चिच्छलयितुमिमं मामुपास्ते किलाय,
बालस्यैवं न खलु निपुणा बुद्धिरन्यत्र दृष्टा ॥३४॥

आरब्धं व्याकरणमचिरं यत् समध्येतुमादौ,
स्वल्पैर्मासैः सुनिशितधिया प्रापितं तत् समाप्तिम् ।
सन्धौ शब्दे बुधसमुचितं यत् सुबन्ते तिङन्ते,
ज्ञानं बालस्तदखिलमगाद् यच्च धातौ कृदन्ते ॥३५॥

या या वैयाकरणनियमप्रक्रिया चातिगुर्वी,
सा सा स्वल्पश्रममधिगता बालभावेऽप्यनेन ।
ज्ञानं यत्तद्धितयुतपदे कारके वा समासे,
तत्राप्येष प्रमतिरगमत् पूर्णतां जीवकल्पः ॥३६॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तत् किं बालः क्वचन पुरतः शब्दशास्त्रं पपाठ,
तस्मादुक्तिर्न दुरधिगमा कापि तत्रावभासे ।
सर्वं वस्तु प्रकटमभवत् पूर्वविज्ञातकल्पं,
तादृक् खल्पे वयसि किमु वा सम्भवी पूर्वपाठः ? ॥३७॥

किंवा जन्मान्तरपरिगतः शास्त्रसंस्कारराशि-,
र्जन्मन्यस्मिन् स्मरणजनकः पाठनोद्बुद्धरूपः ।
यद् वा तद् वा भवतु मयका पाठितोऽयं किलाग्रे,
विद्वत्कीर्त्या ध्रुवममितया मां सकीर्त्तिं विधाता ॥३८॥

बालेनादौ पठितमभवत् केवलं शब्दशास्त्रं,
तेनैवासौ रचयितुमलं देववाण्या निबन्धम् ।
पद्यं तद्वत् सुकरघटनं छन्दसाल्पाक्षरेण,
तत् साहित्याध्ययनमधुना प्राप्तकालं किलास्य ॥३९॥

सत्साहित्याध्ययनविधिना पाकसीमां प्रपन्ने,
काव्याध्वन्यध्वनिगुणरसालङ्कृतीनां प्रबोधे ।
भव्यैः काव्यैरिह विरचितैः सर्वथा दोषमुक्तैः,
प्राच्यानच्च्यानपि कविवरानेष नूनं विजेता ॥४०॥

वाणीनाथः प्रियतमगुणं प्राह शिष्यं तदानीं,
सञ्चिन्त्यैवं प्रियतम ! वृता शब्दशास्त्राब्धिसीमा ।
अध्येतव्यं तदनु सदृशं काव्यशास्त्रं त्वयाद्य,
काव्यस्योदाहरणविधया शब्दशास्त्रे ह्यपेक्षा ॥४१॥

गुर्वादिष्टः प्रयतचरितः काव्यशास्त्रस्य पाठं,
प्रारेभेऽसौ शितमति-सहाध्यायिनां सेर्ष्यदृष्ट्या ।
ये तत्रासन्ननिपुणधियस्ते तदुत्कर्षबुद्ध्या,
मानं तस्य व्यदधत परं लोकरीतिः किलैषा ॥४२॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

आदौ काव्यं सुगमसुगमं तेन यत्नैरधीतं,
किञ्चित्कालोत्तरमपि महाकाव्यजातं गुणाढ्यम् ।
नाट्यं नानारसविलसितं सद्गुणं गद्यकाव्यं,
स्वल्पैर्यत्नैः समपठदसौ ध्यानयुक्तः क्रमेण ॥४३॥

काव्यालम्बं परमधिजगे गुर्वलङ्कारशास्त्रं,
येन ज्ञातं भवति पठतां निर्मलं काव्यरूपम् ।
शाब्दी वृत्तिर्ध्वनिरपि नवव्यञ्जनाशक्तिगम्यः,
काव्यप्राणाः प्रियनवरसा नायकादिप्रकाराः ॥४४॥

नानाकारा लघुगुरुभिदावर्णना रूपकाणां,
नाट्यप्राणप्रतिमघटनाः सन्धयः सुप्रकाशाः ।
काव्योत्कर्षक्षमगुणगणा दुःश्रवत्वादिदोषाः,
शाब्दा आर्था अपि बहुविधालङ्कृतीनां प्रभेदाः ॥४५॥

तत्राचार्य्यादधिगतवतः स्वल्वलङ्कारशास्त्रं,
तेषु ज्ञानं प्रकटमभवत् स्वल्पकालेन तस्य ।
छन्दोग्रन्थानपि कतिपयानेष यत्नैः पठित्वा,
छन्दोज्ञानं समधिगतवान् पद्यनिर्माणबीजम् ॥४६॥

आसीद् बाल्यादभिनयविधौ तस्य रागो गरीयान्,
नाट्यं किञ्चिद् व्यरचयदसौ तेन गीर्वाणवाण्या ।
यत्सम्प्रीत्या रसिकवटवोऽत्याग्रहेणाभिनोय,
प्राज्यां कीर्त्तिं व्यदधुरभितस्तत्कवेरात्मनाञ्च ॥४७॥

स व्याख्याने सुपटुरभवत् पुण्यगीर्वाणवाण्या,
श्रावं श्रावं यदतिललितं मुग्धचित्ताः सदस्याः ।
देवं वाचस्पतिमुपगतं मेनिरे तं वदन्तं,
लोकातीतं हरति हृदयं मानवानां स्वभावात् ॥४८॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

आद्यामन्त्रं त्रिगुणितमसौ सञ्जपन्नाप्तदीक्षो,
गद्ये पद्येऽपि च सुविपुलां वाङ्मये शक्तिमापत् ।
शक्तिं सञ्चारयितुमपरत्रापि तां लोकहृद्यां,
काञ्चिच्चक्रे वटुपरिषदं मासि मासि प्रसक्ताम् ॥४९॥

एकः कृत्वा क्वचन विषये देववाणीनिबन्धं,
काले तस्यां परिषदि गतो वाचयामास यत्नात् ।
आकर्ण्यान्ये निपुणवटवस्तं समालोच्य सूक्ष्मम्,
दैव्या वाण्या निजमतमुपन्यस्य याताः प्रशस्तिम् ॥५०॥

मध्ये मध्ये परिषदि समालम्ब्य शास्त्रार्थतत्त्वं,
योग्यं पक्षद्वयमुपगतं क्वापि मासे विवादम् ।
तन्माध्यस्थ्यं गुरुरनुसरन् पक्षपातं विहाय,
जेतुर्जातं विजयमवदद् भूरिमोदं दधानः ॥५१॥

श्यामादासः प्रकृतिनिपुणः प्रायशः सूक्ष्मदर्शी,
वाक्ये वाचस्पतिरिव पटुर्जेतृकीर्त्तिं प्रपेदे ।
सूरे दीप्तिं वितरति नभःप्राङ्गणे निर्विरोधं,
नक्षत्राणामतिलघुरुचां निष्प्रभत्वं प्रकृत्या ॥५२॥

एवम्भूते परिषदि विधौ सन्ततं जायमाने,
सच्छात्राणां मनसि विषमं क्षोभमाशङ्कमानः ।
वाणीनाथोऽपरवटुयुगं योजयित्वा विवादे,
तत्रैवैकं विजयिनमशाद् योग्यतासव्यपेक्षः ॥५३॥

शून्ये यावन्न चरति रविस्तीक्ष्णदीप्त्या समृद्ध-,
स्तावत्तस्मिन् दधति परितस्तारका दृश्यभूयम् ।
श्यामादासे परिषदि ततो वैरितामप्रपन्ने,
तस्मादन्यो यदिह विजयी तत्र किं वाऽस्तु चित्रम् ॥५४॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

गद्ये काव्ये प्रथितयशसो दण्डि-बाणादयो ये,
तेषां रीत्या व्यरचयदसौ गद्यकाव्यं प्रशस्तम् ।
सानुप्रासं ध्वनिसुरुचिरं रम्यपूर्णोपमाद्यैः,
सालङ्कारं रससमुचिता यत्र रीतिर्गुणश्च ॥५५॥

यस्मिन् काले कविकुलरविं दण्डिनं सोऽनुकृत्य,
शब्दावृत्त्या श्रुतिसुखकरं स्वल्पदीर्घ्यत्समासम् ।
सालङ्कारं बहुरसमयं मोहनं गद्यकाव्यं,
चक्रे दण्डी जित इव तदा तेन तस्य प्रकर्षात् ॥५६॥

यावच्चक्रे रसमयकथां बाणकाव्यानुकारं,
श्लेषोत्प्रेक्षाप्रभृतिगहनां दीर्घशब्दां समासैः ।
संवादादौ सरलमधुरां रम्यवृत्तां रसाढ्यां,
तावज्जन्मान्तरमिव गतं बाणमाहुर्बुधास्तम् ॥५७॥

पद्ये काव्ये स खलु समभूत् कालिदासस्वभाव-,
स्तत्राकामं समगत गुणो यत् प्रसादः पदेषु ।
वाचोऽप्यर्थान्तरसदुपमाद्युन्नतव्यङ्ग्यसाराः,
शब्दादीनां न्यसनविधये नात्र भाति स्म कष्टम् ॥५८॥

तेनाधीतं यदवधि महत् कालिदासस्य काव्यं,
चित्तं तस्मिन्नपरविषयादाहृतं सन्निवेश्य ।
तत्सान्निध्यात्तदवधि गुणैस्तद्गतैर्वासितं हृत्,
सत्काव्यं तद्गुणगणयुतं स्वप्रकृत्याभ्यसूत ॥५९॥

श्रीहर्षीयं सुललितपदं काव्यमाराध्य तस्य,
तत्तात्पर्यं न हि रतिरभूदद्भुतार्थादिजुष्टे ।
तस्मिन् काव्ये सुललितपदन्यासहेतोः कदाचित्,
पद्यार्थानां कविगणमनः पौनरुक्त्यं दुनोति ॥६०॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अत्र श्लोकाः कतिचन दुरूहार्थयोगान्न हृद्या-
श्चिन्ताश्रान्ति परिहृतवता नैव ते सुग्रहार्थाः ।
किञ्चित् सौख्यं सुललितपदाद् यद्धि जागर्त्ति पूर्वं
भावं बोद्धुं श्रमततिकृतं दुःखमस्माद् गरीयः ॥६१॥

माघे भावो न दुरधिगमो नाप्यलङ्कारजातं
क्लेशाद् गम्यं विविधविषया वर्णना चातिहृद्या ।
श्लेषो नानाविध उपनतो दर्शनार्थश्च रम्यो
जुष्टं तद् दुःश्रवपदचयैः किन्तु दुःखं प्रसूते ॥६२॥

माघः प्राज्ञो भृशमिति सतां सत्यभूतैव वाणी
किन्तु श्रेष्ठा न खलु कविताशक्तिरत्रावभासे ।
दीर्घां चिन्तां हृदि कलयताकारि माघेन काव्यं
शब्दादीनां तदुपरचिते नाश्रमं सन्निवेशः ॥६३॥

तस्मिन् शब्दा सुदुरधिगमाः सन्निविष्टा ह्यनेके,
येषां कोषाध्ययनजमृते ज्ञानमर्थो न गम्यः ।
माघं काव्यं रमयति मनस्तन्न साधारणानां,
काव्यं नैवं व्यरचयदसौ सत्कविः कालिदासः ॥६४॥

तस्मान्माघात् कविरतितरामुत्तमः कालिदास-
स्तस्यैवास्मात् सरणिवरणं तस्य रम्यं व्यभासीत् ।
अल्पज्ञास्ते त्रिगुणघटनान्माघमाहुर्वरं ये,
माघस्तोतुर्ध्रुवमनुचितं तद्वचः कस्यचित् स्यात् ॥६५॥

तस्मात् सर्वान् कविपरिवृढान् ज्ञानतो वर्जयित्वा,
स्वादर्शं स व्यधित कवितासाधने कालिदासम् ।
प्रीतो येनापरमनुजवत् तत्कवित्वप्रभावाद् ,
वाणीनाथो गुरुरधिगुणो भूरिविद्यासनाथः ॥६६॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्यामादासं स रहसि गुरुः प्राह सम्बोध्य काले,
काव्ये ज्ञानं त्वमधिगतवान् पूर्णरूपं क्रमेण ।
प्राचीनानां प्रथितयशसां काव्यमार्गे कवीनां,
शक्त्या जन्मान्तरनिचितया कीर्त्तिधारां गतोऽसि ॥६७॥

लोके जन्मान्तरपरिचिता वासना यानुवृत्ता,
काव्ये हेतुर्भवति किल सा नैकिका सुप्रशस्ते ।
शास्त्रज्ञानं प्रचलितजगद्वृत्तवृन्दानुभूतिः,
काव्यज्ञानां वचनशरणाभ्यास एतौ सहायौ ॥६८॥

पाठस्ते व्याकरणविषयः सर्वथापत् समाप्तिं,
काव्यं नानाकविविरचितं भूरियत्नैरधीतम् ।
लौकं वृत्तं विदितममितं संश्रिताभ्याससीमा,
यस्माद् यस्मादसि सुनिपुणः काव्यनिर्माणकृत्ये ॥६९॥

किन्तूत्कर्षावधिसमुदये भिन्नशास्त्रावबोधो,
भूम्नापेक्ष्यः परिचितिरथो तर्कशास्त्रे विशेषात् ।
सत्साहित्ये शरणमसमं यद्धयलङ्कारशास्त्रं,
तद्विज्ञाने प्रतिपदमहो ! सम्बलं तर्कशास्त्रम् ॥७०॥

तस्मादादौ पठनमुचितं तर्कशास्त्रस्य वत्स !
यद् वै भूम्ना समुपकुरुते भिन्नशास्त्रार्थबोधम् ।
तर्कज्ञाने तदनु सुतरां पूर्णतां सम्प्रयाते,
योग्यं शास्त्रं किमपि किमपि ज्ञेयमन्यत् प्रयत्नात् ॥७१॥

इत्यादिष्टः सपदि गुरुणा पुण्यलग्ने कदाचित्,
प्रीत्यारेभे पठितुमनघं नूतनं तर्कशास्त्रम् ।
आदौ वैशेषिकमतमितांस्तार्किकैरभ्युपेतान्,
श्यामादासो गुरुवदनतः सप्त जज्ञौ पदार्थान् ॥७२॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

उद्दिष्टानां गुरुरपमलं लक्षणं व्याचचक्षे,
तेषां भेदानथ विहितवान् सिद्धियोग्यां परीक्षाम् ।
येनायत्यामतिहितकरी ज्ञानभित्तिः प्रशस्ता.
तस्योद्दीप्तप्रतिभहृदये सम्प्रपेदे प्रतिष्ठाम् ॥७३॥

तस्मादर्वागनुमितिनयस्योपकारोपयुक्तान्,
साध्यव्याप्तिप्रकटनपटुग्रन्थसङ्घान् विवेद ।
यद् यत् तत्त्वं गुरुरकथयत् तत्तदक्षीणरूपं,
हित्वा कालात्ययमतिदृढं तस्य चित्ते निरूढम् ॥७४॥

तस्मादर्वाक् समधिगतवान् पक्षतां टीकयाढ्यां,
हेत्वाभासप्रकरणचयांश्चानुमानप्रभेदान् ।
तर्कं व्याप्तिग्रहमनुमितेर्लक्षणाद्यर्थजातं,
दीधित्यादिप्रकटितरहस्यं सहायं विधाय ॥७५॥

ग्रन्थानन्यानवयवमुखान् दीधितिव्याख्यया च ,
गादाधर्य्याद्युपकलितयाधीत्य नित्यं सयत्नम् ।
प्रत्यक्षादेरपि बहुतरग्रन्थरत्नान्यपाठीद्,
नव्यन्याये भवति किल यैर्ज्ञानसीमान्तलाभः ॥७६॥

प्राच्यन्याये कतिचन ततो ग्रन्थरत्नान्यधीत्य,
ज्ञानं प्राप्तः सदभिलषितं गाढमध्यात्मतत्त्वे ।
यन्मुक्तानामपरसविधे शुष्कतर्काश्रयत्वा-,
न्निन्दाभूमा प्रसरति सदा तार्किकाणां बुधानाम् ॥७७॥

एवं यावत् परिणतमतिस्तर्कशास्त्रे नवीने,
प्राच्ये न्यायेऽपि च समभवत् स्वस्य विद्यार्थिमुख्यः ।
श्यामादासो निजगुण-गुरुस्नेहपात्रं तदानीं,
वाणीनाथः स्वतनयगुणैनेव गर्वं जगाम ॥७८॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

भूयो भूयः सदसि विजयं प्राप्य शास्त्रार्थवादे,
श्यामादासो बहुपरिचितः पण्डितानां समाजे ।
काले सोऽयं समधिगतवान् यौवनं स्वे शरीरे,
वृक्षाः पुष्पं सुरभिसमये स्वं यथा संश्रयन्ते ॥७९॥

वाणीनाथो रहसि तमतिस्नेहमाहूय काले,
साशीर्वादं शिरसि निदधत् स्वं करं प्राह मुग्धः ।
स्वस्त्यास्तां ते प्रियतम ! गतस्त्वं चिदम्भोधिपारं,
पाठस्यान्ते तदिह गुरवे दक्षिणा ते प्रदेया ॥८०॥

श्रुत्वा वाचं गुरुनिगदितां विस्मितः सन् निमेषं,
हर्षन्नातो गुरुचरणयोरानतो बद्धपाणिः ।
श्यामादासोऽभ्यधित भगवन्नद्य मे जन्म धन्यं,
यन्मां देवश्चिरमनुगतं दक्षिणार्थं नियुङ्क्ते ॥८१॥

किन्तु स्वान्तं विकलविकलं चिन्तयित्वा किलेदं,
यद् दूरे स्यां गुरुचरणयोरन्तिकादूर्ध्वमस्मात् ।
मातुस्तातादिकगुरुवरस्यादरिण्याः स्वसुश्च,
विच्छेदो मे हृदि समुदितो दुःखधारां तनोति ॥८२॥

एतद् विद्याभवनमसमं वापिका स्वच्छतोया,
वृक्षश्रेणी तटपरिगता मार्गपार्श्वस्थिता च ।
पुष्पोद्यानं विविधकुसुमैः सन्ततं शोभमानं,
सर्वं भावि स्मृतिपथगतं दुःखधारानुभूत्यै ॥८३॥

गन्तव्यं मे स्वभवनमितः शिक्षणान्ते तथापि,
यस्मात्तातो जनकजनकस्तातमाता तथाम्बा ।
स्निग्धाश्चान्ये स्वजननिवहा मत्पथं वीक्षमाणाः,
सर्वे कालं कथमपि मया वर्जिता यापयन्ति ॥८४॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

यत् सौभाग्यं मम गुरुपदे दक्षिणादानजन्यं,
तन्निर्देशादतिलघु यथा स्यात्तथा देव ! कार्य्यम् ।
यत्कारुण्याद् गहनगहनं तामसं मे निरस्तं
किं वा तस्मै न खलु भवते देयभूयं वृणीते ॥८५॥

वाणीनाथोऽवददथ वचः सस्मितं स्नेहपूर्वं,
जानाम्येवं किल सुचरितं वत्स ! ते सर्वकालम् ।
तद् वाचं मे शृणु कथयतो नाहमन्यत् प्रयाचे,
त्वामेवाहं बहुगुणमयं प्रार्थये दक्षिणार्थम् ॥८६॥

एका कन्या मम सुचरिता वर्णमात्रेण कृष्णा,
नाम्ना राधा पृथुकसमयादप्रगल्भस्वभावा ।
या वः सर्वान् रमयति चिरं सोदरत्वेन मत्वा,
तां दत्त्वा ते घटयितुमिहेच्छामि जामातरं त्वाम् ॥८७॥

श्यामादासो गुरुवदनतः स्वान्तकोणेऽप्यसन्तं,
स्वप्नातीतं विषयमवयन् नम्रवक्त्रो निमेषम् ।
आख्यल्लज्जामृदुलितपदं देव ! भीतो ब्रवीमि,
देहे स्वाम्यं न हि मम, पितुस्तत्पितुश्चेति जाने ॥८८॥

किञ्च ग्राह्या नहि गुरुसुता शास्त्रशिष्टप्रजानां,
शिष्टप्रष्ठा गुरुदुहितरं स्वां स्वसारं विदन्ति ।
सा चेद् भार्य्या निरयपतनं भावि नूनं ग्रहीतुः,
किं तत्कृत्ये कलुषविषमे तत्र देवो नियुङ्क्ते ॥८९॥

वाणीनाथोऽवददथ पुरस्तात ! युक्तं त्वयोक्तं,
सद्वृत्तानां वचनरचना तादृशी साधुहृद्या ।
आस्तां, तातस्तव पितृपिता चात्र गत्वानुनेयौ,
वस्तुन्यस्मिन् कथमपि न ते प्रातिकूल्यं तु कार्य्यम् ॥९०॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अर्वागुक्तं यदपि वचनं वत्स ! तत्रावधेयं,
यस्य प्राह्या न खलु दुहिता ब्रह्मदाता गुरुः सः ।
एतत्तत्त्वं दिशति सुदृढं प्राक्तनं मत्स्यसूक्तं,
तस्माद् भीतिं परिहर गुरोः कामनां पूरयेथाः ॥९१॥

वैरं कुर्य्यां यदि कथमपि श्रीगुरोः कामनायां,
नूनं यायां विषमनिरयं तत्समुद्भूतपापात् ।
तस्मान्नाहं भवदभिमते प्रातिकूल्यं करिष्ये,
श्यामादासो विनयमधुरां वाचमेवं बभाषे ॥९२॥

वाणीनाथस्तमथ नितरामाशिषा वर्द्धयित्वा,
श्यामादासं व्यसृजदहरन् काललेशं परस्तात् ।
प्राप्तो बाह्यं भवनमपि स ध्यानमग्नः स्वतल्पे,
गुर्वादेशं मनसि कलयन् संजहौ चित्तशान्तिम् ॥९३॥

तस्मादह्नः प्रभृति न कदाप्याप बाह्यं निकेतं,
राधा बालोचितचलगतिः पूर्ववत् प्राप्तलज्जा ।
श्यामादासो गुरुचरणयोर्धूलिमादाय शीर्षे,
गेहं प्रागात् कतिपयदिनानन्तरं दृनदृनः ॥९४॥

वाणीनाथः कतिपयदिनाभ्यन्तरे कोट्टलाख्य-
पुर्य्यां गत्वा प्रणतशिरसा विप्रदासं ववन्दे ।
श्यामादासो गुरुचरणयोरानतो विष्णुदासोऽ,
प्येवं प्राज्ञातिथिमुपगतः स्वं कृतार्थं विवेद ॥९५॥

सेवां योग्यातिथिसमुचितां तत्र सम्प्राप्य हृष्टो,
वाणीनाथः स्वमभिलषितं व्याहरद् विप्रदासम् ।
सोऽपि स्मृत्वोपकृतिमसमां तत्कृतां शुद्धसत्त्वः,
प्रत्यश्रौषीत् प्रकृतविषयं पौत्रविद्याप्रदाने ॥९६॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कामं लब्ध्वातिथिरयमगात् स्वं निवासं सुशीघ्रं,
गत्वा तत्र द्रुतमघटयत्तद्विवाहप्रबन्धम् ।
श्यामादासः शुभमयदिने पुण्यलग्ने च राधां,
श्यामाश्यामां मलिनमनसा तत्र गत्वोपयेमे ॥९७॥

वामे राधामधिगतवतस्तस्य गौरस्य देहे,
श्यामां वामे समजनि यतः शङ्करस्येव शोभा ।
किंवा कृष्णं हरिणमवतः श्वेतभानोरिवाभा,
नीलं मध्यं मणिमिव यतो हेमहारस्य कान्तिः ।९८॥

कन्यादानात् परमुपगते तत्र घस्रे द्वितीये,
निष्ठां याते विधिमनुगते लाजहोमादिकृत्ये ।
सिद्धाचारे प्रसरति तथा सप्तपद्या प्रयाणे,
ब्राह्मोद्वाहो निरवहदसौ मङ्गलानन्दपूर्णः ॥९९॥

पित्रादीनां नयनसलिलैः स्नेहमूलैः प्रसिक्ता,
स्वाश्रुस्नाता नवपुरगतिं भावयित्वा सुभीता ।
मातापित्रोर्विरहविमना भूरिदुःखानुभूत्यै,
मन्दाक्रान्ता पतिगृहमभि प्रस्थिता साथ राधा ॥१००॥

सोदर्य्यावत् परिणयविधेः पूर्वतो यामगृह्णात्
श्यामादासः परिणयविधेरुत्तरं तामकस्मात् ।
दोषान्मुक्तामपि सुचरितां मन्ददृष्ट्यानुशिष्टः,
सोऽयं द्वेषोपहतहृदयो नान्वमंस्ताच्चिदृश्याम् ॥१०१॥

राधां मन्दग्रहवदसितां स्वीयवर्णापहर्त्रीं,
मत्वा मन्दः प्रकुपितमनाः क्रौर्य्यमागात् किमस्याम् ।
तस्माद्धेतोरजनयदसौ किन्नु दौर्गत्यमस्यां,
भ्रष्टा पत्युः प्रणयविभवाद् येन भाग्येन राधा ॥१०२॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

मन्दः क्रूरो नियतसमयं प्राप्य भोगाय राधां,
बाधामाधात् पतिकृतहिते नित्यमेवैष तस्याः ।
वाणीनाथो यददित सुतां तां परस्मै वयःस्थां,
सोऽयं सोढुं न तदलमभूत् किं निजक्रौर्य्यदोषात् ॥१०३॥

भोग्यैका चेदुभतरुणयोर्याति सा चैकरागं,
तस्यां कोपः प्रसरति तदान्यस्य कामाभिघातात् ।
श्यामादासे पतिसमुचितं प्रेम गाढं वहन्त्यां,
श्रीराधायां कथमिह तदा मास्तु मन्दस्य कोपः ॥१०४॥

क्रूराचारः शनिरशनिवद् दारुणः स ह्यकस्मा-
ल्लोकानिष्टं घटयति किमप्यस्य नो शक्तिवाह्यम् ।
देवादीनामपि परिभवे तस्य शक्तिर्निरूढा,
किन्तच्चित्तं यदयमवधीन्मानवस्य स्वभावम् ॥१०५॥

राधा यावत् पतिपुरमसौ प्राप तावत् समेताः,
सर्वे राधामसितवपुषं वीक्ष्य जाता विषण्णाः ।
तेषां नानाविधवरवधूतारतम्यादिवादैः,
श्यामादासः कुशलमतिरप्याप वध्वां विरागम् ॥१०६॥

पूर्वं यस्यां गुरुकुलगतः स्नेहमेष प्रपेदे,
सोदर्य्यायामिव गुरुसुतेत्यस्मरन् रूपदैन्यम् ।
तस्यां मन्दग्रहविभवतो दारभूयं गतायां,
द्वेषः स्नेहं वत विघटयन्नन्तरासाम्बभूव ॥१०७॥

राधा पत्युर्विरहविधुरा चक्रवाकीव दूना,
श्वश्र्वा सार्द्धं विरहशयनं संश्रयन्ती विलोला ।
स्वीयं भाग्यं विषमविषमं मानिनाधिक्षिपन्ती,
रात्रिं चिन्तागहनमनसाज्ञातयामामनैषीत् ॥१०८॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्यामादासं क्वचन समये छन्दतः प्राप्तवासं,
प्रेम्णा द्रष्टुं नयनसरणिं यातवत्याश्च तस्याम् ।
दृष्टिं द्वेषादतिलघु ततः कुञ्चितां सन्निवर्त्य,
हित्वा वासं विषमविपदो मुक्तिमेष प्रपेदे ॥१०६॥

सोऽयं प्रीत्या जनकविहिते बाह्यविद्यानिवासे,
ज्ञानोत्कर्षेरधिकृतहृदोऽध्यापयत्तातशिष्यान् ।
विद्योत्कर्षं व्यधित बहुधा तत्र तेषां स यत्नात्,
कालेऽन्यस्मिन्नकृत रचनां सन्निबन्धावलीनाम् ॥११०॥

माता पुत्रं क्वचन समये सम्प्रशास्ति स्म यत्ना-
न्मन्दं मृष्ट्वा वपुरभिदधे तातमाताप्यनेकम् ।
वध्वा नानाविधगुणकथां प्रोचतुस्ते प्रसङ्गात्,
सर्वं व्यर्थं समजनि मनस्यस्य नाप्त्वा प्रभावम् ॥१११॥

तातस्येदं जनकजनकस्यापि नो दृष्टिबाह्यं,
श्यामादासं सममदिशतां तौ तदासीत् स मौनी ।
वध्वा सार्द्धं व्यवहृतिमसौ किन्तु पूर्वानुरूपां,
त्यक्तुं शक्तो न हि समभवद् दृप्तवैराग्यवैरात् ॥११२॥

इति मन्दाक्रान्तावृत्तखण्डकाव्ये चतुर्थविलासः समाप्तः ।

—०—

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पञ्चमो विलासः

वर्षेष्वेवं किल कतिपयेष्वासवत्सु प्रणाशं,
राधादेहं समधिकृतवानामयो दुश्चिकित्स्यः ।
नित्यं स्वल्पज्वरपरिभवो वासरान्तेऽनुभूतः,
कासः स्वल्पो वपुरपि परं कार्श्यमापत् क्रमेण ॥१॥

गृह्यैः कासज्वरशमकरैरौषधैः सुप्रयुक्तै-
र्यावच्छान्तिं बहुलदिवसैरप्यसौ नाप रोगः ।
तावच्चिन्ताकुलमतितया विप्रदासानुमत्या,
हूतो धन्वन्तरिरिव गुणी विष्णुदासेन वैद्यः ॥२॥

सोऽयं प्रातर्द्रुतमुपगतो विप्रदासादिमाना-
च्छ्रुत्वावस्थां सपदि विदधे तद्रुजायाः परीक्षाम् ।
अन्तेऽवादीदतिभयमयस्यामयस्याक्रमोऽभू-
दौदासीन्यं वपुषि विहितं तेन जाता रुजेयम् ॥३॥

दीर्घं कालं नियतमनया भोजनं नो गृहीतं,
निद्रा नाप्ता निशि नरवपुःस्वास्थ्ययोग्यापि नूनम् ।
चिन्ता काचन्मिनसि सततं भाति सन्तापदात्री,
नानाधातुक्षयकरसमापत्तिरेतन्निदानम् ॥४॥

शास्त्रे प्रोक्तं यदिह फलभागौषधं तत् प्रदास्ये,
पथ्यं तस्मादतिगुरु यदत्रौषधेन प्रयोज्यम् ।
काले सेव्यं विपुलबलदाहार्य्यजातं सुजीर्णं,
तत् कुर्य्यान्मे कुशलफलदं भेषजं निर्विकल्पम् ॥५॥

चिन्ता त्याज्या मनसि विषमा दुःखवीजं विताड्यं,
यस्योत्तापाद्धृदयमसमं तापमाप्नोति नित्यम् ।
रात्रौ सेव्या सुखमतिहिता तद्रुजायां सुषुप्तिः,
सम्प्रत्यस्या नहि हितकरं स्वामिनः सन्निधानम् ॥६॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

एवं रीत्या यदि किल भवेद् रोगिणी पथ्यवृत्तिः,
सम्भाव्यास्याः कथमपि तदा रोगभोगाद् विमुक्तिः ।
नो चेदेवं विषममशिवं भावि मन्येऽन्तिकस्थं,
तस्मादस्मिन् स्वजननिवहाः सावधाना भवन्तु ॥७॥

उक्त्वा चैवं कनकरजतादुद्भवान्यौषधानि,
योग्यान्यस्या रुगुपशमने संव्यवस्थाप्य यत्नात् ।
तस्माद् गेहात् स्वमुदवसितं प्रस्थिते वैद्यराजे,
तद्गेहस्था भृशमशरणाः सागरान्तर्निमग्नाः ॥८॥

श्यामादासं रहसि च ततो विष्णुदासो जगाद,
वैद्यो यद् यद् वचनमवदत् तत् त्वयाश्रावि सर्वम् ।
तद् राधाया रुजि किमिह नो मन्यसे स्वं निदानं,
तस्याः प्राणा यदसमरुजा संशयं सम्प्रपन्नाः ॥९॥

श्यामादासः पितृनिगदितां स्पष्टवाचं निशम्य,
तप्तोऽमुञ्चद् विनतवदनः केवलं नेत्रवाष्पम् ।
तातोऽवादीद् वद किमधुना वाष्पवर्षैः फलं स्यात्,
कृष्णा राधा नहि परिहरेन्नो यथा नद् विधेहि ॥१०॥

अन्तः कालानलमिव वहन् दुःखसंरुद्धवाष्प-,
स्तच्छ्रुत्वासौ पितृगृहपदं त्यक्तवान् मन्दमन्दम् ।
राधाव्याधौ स्वमपकरुणं हेतुभूतं विभाव्य,
निन्दामुक्तौ न सरणिमगाल्लोकतो धर्मतश्च ॥११॥

वाणीनाथो मम गुरुवरः स्वप्रियायाः पितापि,
दीर्घं कालं निजतनयवत् पालितस्तेन चाहम् ।
तेन प्रत्तां निजतनुजनिं कन्यकां सावहेलं,
हित्वा यायां कमिव निरयं नैव जाने कृतघ्नः ॥१२॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

धर्म्यैरेषा विमलचरिता श्रौतमन्त्रैर्गृहीता,
जाता सर्वालयपरिजनप्रेमपात्री चिराय ।
तामप्येनां परिहृतवतो भाविनी का गतिर्मे,
लोकातीतं विषमदुरितं दुर्गतिं संविधत्ते ॥१३॥

तस्याः कृष्णं यदजनि वपुस्तन्न सा दोषशून्या,
कश्चिद् गौरं कमपि च जनं कृष्णमीशो विधत्ते ।
विज्ञाने तु प्रचितमतयः शाकपाकादिजन्यं,
श्यामं रूपं विमलमपि वा लोकदेहे वदन्ति ॥१४॥

निर्दोषत्वं स्थितमुभयथैवात्र रूपे हि तस्या-,
स्तत् किं निष्कारणमिह गतो द्वेषमेष प्रगाढम् ।
एषा नूनं प्रतिपलमहो ! मां विमूढं मृशन्ती,
मत्पत्नीत्वं निजमघशतैराहितं निश्चिनोति ॥१५॥

साध्वी पत्युर्मिलनमधिकं मन्यते स्वर्गसङ्गात्,
तद्विच्छेदं विषमनिरयं घोरदुःखानुविद्धम् ।
राधा तस्मान्मम विरहतो जीवने निर्व्यपेक्षा,
दुःखाघातादशनशयने सज्जहौ तद्वदन्यत् ॥१६॥

तस्मादेव क्षयसमुदयादेष दुःसाध्यरोगो,
राधादेहे पदमकुरुतेत्याह वैद्योऽतिविद्यः ।
अस्या जातं शमयितुममुं संक्षयं सैव शक्ता,
रोगादस्मात् कथमपि भवेन्निष्कृतिर्नान्यथास्याः ॥१७॥

तत्तां दृष्ट्वा रहसि मधुरैर्भाषितैः सन्दिशेयं,
येनाहार्य्यं बलकरमसौ प्रीतिपूर्वं गृहीत्वा ।
तद्वद् देहक्षयकरविधीनन्वहं वर्जयित्वा,
प्राग्वत् पुष्टा वपुषि पुरतो रोगमुक्तिं प्रयायात् ॥१८॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

इत्थं मत्वा चपलहृदयः स द्रुतं प्राप राधां,
मात्रा दुःखोपहतमनसानेकधा सेव्यमानाम् ।
तत्र प्राप्तं मलिनवदनं तं समालोक्य माता,
वत्सायाहीत्यभिहितवती तद्गृहान्निर्गताभूत् ॥१९॥

तत्रासम्भावितमुपनतं स्वामिनं वीक्ष्य राधा,
वध्वाचारात् कृशतनुरपि प्रोद्भवत्सम्भ्रमाभूत् ।
श्यामादासोऽवददलमलं तन्वि ! भूरिप्रयासैः,
शय्योत्थानं तव हि नितरां व्याधिवृद्धिं विदध्यात् ॥२०॥

राधा पत्युर्वचनरचनां स्वप्नयोगेऽप्यलब्धां,
श्रुत्वा साक्षादधिहृदमसौ विस्मितामन्यतैवम् ।
किन्नु स्वप्नो मम किमथवा मायिकी सृष्टिरेषा,
किं वा जन्मान्तरचितमहापुण्यपाकः किलायम् ॥२१॥

किं वा रोगैरपहृतबलां लुप्तसञ्जीवनाशां,
द्रष्टुं राधां सुजननियमादागतः प्राणनाथः ।
यद् वा तद् वा भवतु समयं दूरयातं विलोके,
दीपे नष्टे किमु फलमहो तैलधारानिषेकैः ॥२२॥

श्यामादासे सजलनयनं न्यस्य तल्पे शयानां,
राधां पत्यागमनविधिना विस्मितां शीर्णकायाम् ।
आर्त्तोऽवादीद् विकलवचनः सोऽथ शय्यान्तलग्नो,
राधे ! पापं सकरुणहृदा स्वामिनं मां क्षमस्व ॥२३॥

मूढात्माहं तव गुणगणान् स्वर्गयोग्यानुपेक्ष्य,
रूपप्रेम्णा त्वयि वत गतः कृष्णरूपाद् विरागम् ।
अज्ञानं मे विगतमधुना ज्ञानमेतन्मयाप्तं,
गृह्ये कृत्ये न भवति नृणां कोऽपि रूपोपयोगः ॥२४॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

रूपोत्कर्षे सति गुणगणैरान्तरैर्वर्जिता चेद्,
योषा गृह्ये जनयति विधौ नोपयोगस्य लेशम् ।
अन्तः कृष्णं बहिरतितरां रम्यरूपं किमन्य-
न्नेत्रप्रीतेः सृजति हि फलं यन्महाकालसंज्ञम् ॥२५॥

रूपाभावेऽप्युपचितगुणैरान्तरैः सुप्रशस्ता,
कृत्योत्कर्षैर्गृहहितकरी प्रीतिधारां तनोति ।
कृष्णाकारः परभृतचयो नेत्रहारी न लोके,
किन्त्वेतस्य स्वरकृतसुखान्मानभूमा खगेषु ॥२६॥

वृन्दारण्ये नवजलधरश्यामलः कृष्णचन्द्रो,
यद् गोपीनां हृदयमहरद् भिन्नवैलक्षणेन ।
तत्रासीन्नो वपुषि निचिता कृष्णताऽरातिभूता,
नोलाकाशं जलधिरसितः किन्न नः प्रीतिहेतू ॥२७॥

एतत् सर्वं न खलु विदितं यौवनस्यातिमोहा-
न्नानातन्त्राण्यधिगतवतो यन्न योग्यं ममाभूत् ।
काले ज्ञात्वा स्वकृतमसमं दोषराशिं विशेषाद्,
भिक्षाप्रार्थी तव चरणयोरेष नम्रः पतामि ॥२८॥

एवम्भूतं वचनमवशो व्याहरन् यावदेव,
राधापादप्रपतनविधौ स प्रवृत्तो बभूव ।
राधा तावद् विनयशरणा पादसङ्कोचमाख्यद्,
देवस्त्वं मे किमिति स नमन् प्रापिनीं मां करोषि ॥२९॥

पूर्वे जन्मन्यतिगुरु मया साधितं पुण्यकृत्यं,
स्वामी त्वं मे गुरुरिव गुणैर्येन सञ्जातपूर्वः ।
वाणीनाथः शिव इव पिता पार्वतीवच्च माता,
सर्वे सौम्याः स्वजननिवहास्त्वद्गृहेऽप्यागतायाः ॥३०॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तस्मिन् जन्मन्यतिगुरु कृतं दुष्कृतञ्चापि नूनं,
यस्माल्लब्धस्त्वमपि न मया हार्दसङ्गेन लब्धः ।
कृष्णं रूपं मम विगणयन्नेव न त्वं कदाचिद्,
भ्रान्त्याप्यादौ नयनकिरणं संन्यधा विग्रहे मे ॥३१॥

व्यर्थाः प्राणा यदि पतिमनोवाह्यतामेति साध्वी,
शक्रैश्वर्य्यादपि समधिका स्वामिनः प्रीतिरस्याः ।
तस्मादेव प्रियमपि परं जीवनं व्यर्थभूतं,
त्यक्तुं देहक्षयकृदखिलोपायमेवाश्रिताहम् ॥३२॥

मात्रा ज्ञातं न मम चरितं तातमात्रापि पूर्वं
मिथ्यावादैर्मदुपवसने व्याजतो वञ्चिते ते ।
यावत् कार्श्यं सुमहदुदितं प्रक्षयाच्चामयो मे,
तावज् ज्ञातं भिषगपि समामन्त्रितः शोधनार्थम् ॥३३॥

मन्ये नातः परमभिमतं शोधनं शक्तिसाध्यं,
देहे तीव्रां विकृतिमधुना प्रोद्गतां तर्कयामि ।
क्षीणं काये बलमतितरां भोजने नास्ति कामः,
श्वासे कष्टं भवति परमं क्षीयते दृष्टिशक्तिः ॥३४॥

नाप्याशास्यं सकलुषमिदं जीवनं साम्प्रतं मे,
मृत्वा यायां यदि कथमपि क्षेमरूपानुषङ्गम् ।
अग्रे जन्मन्यपि विधिवशात् त्वं यदि स्याः पतिर्मे,
रूपोत्कर्षादपि यदि मयि प्रीतिमान् सम्भवेस्त्वम् ॥३५॥

तावन्मात्रं वचनमसमक्लेशमुच्चारयन्ती,
राधा बाधामुपगतवती श्वासकष्टेन सृष्टाम् ।
श्यामादासः सुपरिचरितुं तां प्रवृत्तस्तदानीं,
मा मा तावद् वद परमितो जोषमास्स्वेत्युवाच ॥३६॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

शीर्षे वातव्यजनमकरोदामृशत्तल्ललाटं,
कण्ठोपान्ते करतलसमामर्शनञ्च व्यधत्त ।
किञ्चित्कालात् परमथ शनैरेष पप्रच्छ राधां,
राधे ! सुस्था किमसि किमु ते श्वासकष्टं व्यतीतम् ॥३७॥

प्रत्यूचे सा दयित ! विगतं श्वासकष्टं कथञ्चित्,
स्वास्थ्यं नास्ते प्रतिपलमहं ज्वालया पीडितास्मि ।
वक्तुं शक्तिर्मम न भवितातः परश्चेति भाति,
तच्छ्लेषं मे वचनमधुना सानुकम्पं गृहाण ॥३८॥

स्यान्मे नूनं मरणमचिरं संशयो नास्ति तस्मिन्,
किन्त्वेका मे तव पदयुगे प्रार्थना यत्त्वमग्रे ।
नो कस्यैचिद् दयित ! दयितामानदानं विदध्याः,
सोढुं शक्यं न हि खलु मया तत् परत्रापि लोके ॥३९॥

शान्तं पापं प्रतिहतमिहास्तामभव्यं त्वदीयं,
कान्ते ! भीतिं जहिहि मरणाद देवता त्वां सुरक्षेत् ।
दैवाद् देवो यदि न करुणां जीवने ते विदध्यात्,
स्वप्नेऽप्यन्या न मम दयिता स्यात्तदेत्याह कान्तः ॥४०॥

पीत्वा पत्युर्वचनममृतं मोदपाथोधिमग्ना,
राधा भूयोऽप्यधिकमधिकं श्वासकष्टं प्रपेदे ।
यन्न प्रापत् प्रशममचिरात् तत् क्रमेणाप वृद्धिं,
सर्वो यत्नः प्रशमनकृते साधितो निष्फलोऽभूत् ॥४१॥

श्रुत्वा घोरां समुदितदशां व्याकुलास्तद्गृहस्थाः,
सर्वे हित्वा निजनिजकृतीरागतास्तत्र शीघ्रम् ।
श्यामादासो विकलकरणो वैद्यसद्म प्रपेदे,
राधा श्वासं चरममजहात् सर्वदुःखं सृजन्ती ॥४२॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

हाहाकारैः सपदि सदनं वायुराराव्रभश्च,
सर्वं व्याप्तं सविधजनता विस्मिताप्ता गृहं तत् ।
भीताः सद्यस्थिततरुगतास्त्यक्तवन्तः स्ववासं,
शून्योद्देशं सममुदपतन् वायसाद्याः सरावाः ॥४३॥

ते किं राधाविरहितमदः सद्य दुःखानुबन्धि,
ध्यात्वा दूरे लघु परिगता वर्जयित्वा तदेतत् ।
प्रत्यानेतुं विगतमथवा जीवनं सुप्रियाया-,
स्तस्या याताः सपदि गणशः शून्यमार्गावलम्बाः ॥४४॥

अन्तर्वर्त्ती परिजननृणां शोकवह्निः प्रदीप्तः,
शुद्धस्नेहात् सुचिरनिचितादद्य राधाधिकारम् ।
शोषं नेता वपुषि शरणं नूनमब्धातुमात्तं,
भीत्येत्थं किं निखिलसलिलं वाष्पभूतं निराच्छेत् ॥४५॥

श्यामादासो भवनमुपयन् दूरतः शोकसूतं,
हाहाकारं सकरुणमुपाकर्ण्य वैद्यं विसर्ज्य ।
एकः शोकाद् गृहगतबहिर्वाटिकायामलिन्दे,
म्लानोऽतिष्ठत् खग इव महावात्यया ध्वस्तनीडः ॥४६॥

मूकीभूय स्थितमतिमनोविप्लवाद् बाह्यदेशे,
दृष्टिं शून्यां चिरमचपलां न्यस्य शब्दाश्रयान्ते ।
धर्त्तुं शीर्षं पतदिव शुचा तत्र संलग्नहस्तं,
दूराद् दृष्ट्वा तमपरजनास्तूर्णमेवापसस्रुः ॥४७॥

प्रातःकालान्नयनसलिलं स्रावयित्वा दिनार्द्धे,
श्रान्ते शोके कियदिव यमी विप्रदासः समेत्य ।
श्यामादासं मृदुलमवदद् वत्स ! मा विक्लवी भू-,
र्लीनप्रज्ञं शुगभिभवतस्त्वामहं भो दिशामि ॥४८॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

काले भाग्यं जनयति जनं भाग्यमेवापहन्ति,
भाग्यं सौख्यं वितरति तथा दुःखधारां तनोति ।
भाग्यादूर्ध्वं न खलु भजते कोऽपि किञ्चिज्जगत्यां,
तत्साचिव्यं समधिकुरुते केवलं लोकयत्नः ॥४९॥

तद् राधाया मरणमधुना यन्त्रितं भाग्ययन्त्रा,
तद्व्यत्यासो न भवितुमलं पौरुषैर्यत्नलक्षैः ।
यद् यत् कर्त्तुं विधिरभिलषेत् तत्तदुत्पादमूलं,
यत्नं सोऽयं घटयति नरस्यात्मनोऽनिच्छयापि ॥५०॥

तस्माद्राधामरणवरणे स्वं निदानं विभाव्य,
पापं लज्जामपि कलयतः शास्त्रतो लोकतश्च,
किन्ते विद्यासुनिशितमते वत्स ! योग्यो विषादो,
विद्याहीनाः प्रकृतविषये मोहमासादयन्ति ॥५१॥

तद् यद् भाग्याद् भवितुमुचितं तत् प्रजातं स्वकाले,
कृत्यं तस्मात् परमनुमतं शास्त्रकृद्भिर्विधेयम् ।
तस्मिन् कृत्ये किल परिहृते स्नेहतो मोहतो वा,
प्रेतात्मा नो सुगतिमयते तप्यतेऽनन्तकालम् ॥५२॥

किञ्चाधीतं स्मर परिचितं प्राच्यमध्यात्मशास्त्र-
मात्मादृष्टाद् व्रजति विविधं विग्रहं भोगहेतोः ।
भोगस्यान्ते स हि परिहरंस्तं दधात्यन्यदेह-,
माकाशस्याल्पक इव घटः सोऽयमस्यास्त्युपाधिः ॥५३॥

सोऽयं नात्मा स खलु भुवने सर्वगो नित्यरूपो,
मिथ्याज्ञानप्रचयजनुषो वासनाब्धेः प्रभावात् ।
आत्मानात्मभ्रमलहरिका बद्धजीवात्मनः स्याद्,
देहापाये तदिह मनुते जीव आत्मप्रणाशम् ॥५४॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

देहोत्पत्तौ जनिमजविभोरात्मनो मन्यमानः,
पुत्रोत्पादाद्युपहितविचित्रोत्सवानादधाति ।
पूर्वादृष्टाकलितवपुषः प्रक्षये चाक्षयस्य,
मत्वा नाशं विशति तिमिरे वाष्पवर्षञ्च सूते ॥५५॥

आत्मा देहानुपहिततया नोपकर्त्ता भवेऽस्मिन् ,
तस्माद् देहक्षयमनुसरन् शोचतीत्यप्ययुक्तम् ।
देहस्यान्तः क्वचन समये निर्विकल्पं हि भावी,
जन्यो भावो जगति निखिलो नश्वरो व्याप्तिरेषा ॥५६॥

तेनावश्यं भवितरि वपुःप्रक्षये को नु शोक,
आत्मन्येवं जननमरणानाश्रये वा कथं सः ।
एवं तत्त्वे सति पथियुगे ज्ञानिनस्ते न योग्यं,
चित्तास्थैर्य्यं तदिह विधये तूर्णमुत्तिष्ठ वत्स ॥५७॥

एवं श्रुत्वा जनकजनकेनोक्तमध्यात्मतत्त्वं,
लज्जानम्रः प्रकटविनयं प्राह दीर्घं श्वसित्वा ।
आर्य्य ! प्रोक्तं यदिह भवता तन्न जानामि नैव,
मोहध्वान्तं विषमविषमं मां तथाप्यावृणोति ॥५८॥

शङ्खः श्वेतो जगति न कदाप्येष पीतत्वमेति,
सत्यामेवं दृढतरमतावप्यहो ! मानवानाम् ।
पित्ताक्रान्त्या भवति नियतं शङ्खपीतत्वबुद्धि-,
र्बाध्यं ज्ञानं न भवति जनिर्यस्य दोषाद् विशेषात् ॥५९॥

आस्तां तावद् भवदुदितया शास्त्रवाचाद्य शिष्ट-,
स्त्यक्त्वा मोहं विधिसमुचितं साधयिष्यामि कृत्यम् ।
यद् राधायाः परभुवि हितं साधयिष्यत्यवश्यं,
जीवन्ती या मम कुचरितैस्तापितासीदशेषम् ॥६०॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

इत्युक्त्वासौ भवनमविशद् विप्रदासेन सार्कं,
यस्मिन् राधा शयनशरणा संवृताक्षी निलीना ।
तस्मान्नीत्वा बहिरुपचितैर्दिव्यगन्धप्रसूनैः,
सिन्दूराद्यैः सदुपकरणैर्भूषयामास राधाम् ॥६१॥

अन्ते पूतैर्हरिहरिरवैः क्रन्दनारावमिश्रैः,
शोकाच्छन्नैर्गृहपरिजनैरन्तिमालोकदूनैः ।
नेत्रैरश्रुप्रकरकलुषैः सम्भ्रमात् सा विसृष्टा,
नीता पृष्ठागतगुरुजना द्राक् श्मशानप्रदेशम् ॥६२॥

वैधे कर्मण्यथ सुविहिते सावधानं समग्रे,
श्यामादासो दहनमददादानने तत्र तस्याः ।
यस्माज्जातां नचिरमशृणोत् प्रार्थनावाचमेतां,
'नो कस्यैचिद् दयित ! दयितामानदानं विदध्याः' ॥६३॥

साध्वीदेहं सकलमचिरादेव वह्निर्ग्रसित्वा,
पूतो गर्वादिव बहुविधां नृत्यलीलां दधानः ।
देहं सत्या उरसि निहितं लुप्तमालोक्य काले,
निर्व्यापारः शिव इव बभौ भूरि भस्मावृतात्मा ॥६४॥

तद्दाहान्ते विहितनियमेनास्थि दग्धावशिष्टं,
सञ्चित्यासन् स्वजननिवहाः स्नानपूताः समस्ताः ।
प्रेतात्मानं नियमविहितैस्तर्पणैस्तर्पयित्वा,
शून्यात्मानो निजनिजपुराण्याविशन् वैधरीत्या ॥६५॥

निःशेषेणापहृतविभवे मन्दिरे स्वे यथाढ्यो,
रात्रौ राधारहितभवने स्वे गृहेऽसौ तथैव ।
श्यामादासो निजशयनके चिन्तयामास नैकं,
वाणीनाथः स्मृतिपथमितस्तस्य जाया च शोच्या ॥६६॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

एवं चिन्ता समजनि मनस्यस्य हा सद्गुरुर्मे,
भाग्याद्धीनो यदयमददान्मह्यमेनां तनूजाम् ।
कन्याप्राणौ मम गुरुरसौ तस्य पत्नी च मेऽम्बा,
तद्दम्पत्योः किमिव भविता हन्त कन्यावियोगे ॥६७॥

धाता नोचेदतिकरुणया तद्द्वयोः श्रोत्रनाशं,
कुर्य्यात् कन्यामरणविषयाकर्णनात् पूर्वमेव ।
तद्दम्पत्योरतिमृदुहृदोस्तर्हि या स्यादवस्था,
सा कन्यायाः सविधगमनानन्दलाभेन वन्द्या ॥६८॥

कालक्षेपाद् बहिरपि तयोर्नश्यताद् दृष्टिशक्ति-,
र्येन प्राप्ता लिपिरपि न तौ ज्ञापयेद् वृत्तमस्याः ।
नो सङ्केतादपि परकृतात्तेन तद्वृत्तधीः स्याद्,
इष्टध्वंसोऽप्यनभिलषितः सन्निरस्यत्यनिष्टम् ॥६९॥

राधा प्रीतिं न हि मम गतेत्येव यावद् गुरुर्मे,
ज्ञात्वा दुःखं महदुपगतस्तावदारभ्य दुःखात् ।
अस्यां पुर्य्यां पदसरसिजं नार्पयद् दूरभूमौ,
सन्देशोऽयं न खलु सहसा तत्र गन्तेति मन्ये ॥७०॥

अस्मात् स्थानाल्लिपिरपि यथा तत्र नो प्रेषिता स्यात्,
तस्मिन्नेतद्गृहगतजनाः सावधाना विधेयाः ।
स्त्रीहत्याया इव यदि गुरोस्तस्य पत्न्याश्च घातात्,
पापं मय्यापतति तदहो ! निष्कृतिः स्यात् कुतो मे ॥७१॥

राधानाशे ध्रुवमहमहो ! हेतुतामभ्युपेतः,
पापः शापादिव हतमतिर्धर्मपत्न्यां विरक्तः ।
हा राधाया ग्रहणदिवसात् साधु यद्याचरिष्यं,
नैषा क्षीणानशनशरणा साभिमानामरिष्यत् ॥७२॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

राधे क्रोधान्मयि न गणितं स्नेहवित्तं स्वपित्रो-,
र्मातापित्रोर्मम पितृपितुस्तातमातुश्च चित्तम् ।
चिन्ताबाह्यान्यपि तव बलादात्महत्यातमांसि,
हत्वात्मानं ध्रुवमितवती येन लोकानसुर्य्यान् ॥७३॥

आत्मोन्नत्यै वपुरिह निजं ये विधौ प्रेरयन्ति,
सर्वैरार्य्यैश्चिरमनुमता आत्मनो रक्षकास्ते ।
अज्ञानाद् ये वपुरिदमकाले विनाशं नयन्ति,
ज्ञानार्थं नो विदधति विधिं घातका ह्यात्मनस्ते ॥७४॥

तेषां लोके निविड़तिमिरेऽनन्तकालं निवासी,
नाम्नासुर्य्यः किल समुदितो यः श्रुतौ घोररूपः ।
किं त्वं मोहाच्चिरमनशनान्मृत्युसङ्कल्पपूर्वं,
क्षीणात्मानं वत हतवती तत्र लोले प्रवेष्टुम् ॥७५॥

पत्युः स्नेहो जनयति फलं पार्थिवं भङ्गुरञ्च,
दैवः स्नेहः फलति च फलं शाश्वतं लोकवाह्यम् ।
पत्युर्दोषात् प्रथमकथितस्नेहतो वञ्चिता त्वं,
स्वस्मिन् स्नेहं किमु घटयितुं चेष्टिता नो द्वितीयम् ॥७६॥

साध्यं लोकोपकरणगणैः काङ्क्षितं वस्तु लब्धुं,
लोका लोकोपकरणगणानेव सम्पादयन्ति ।
काम्यं सौम्ये ! तदुपकरणैर्यद्यसाध्यं तदा ते,
काम्योपायं कमपि शरणीकुर्वते लोकवाह्यम् ॥७७॥

आलोक्य त्वं तव हतपतिं बुद्धिदोषाभिघातात् ,
कृष्णायास्ते विमलचरिते वीतरागं चिराय ।
लोकासाध्यप्रणयनपटुं किं परेशं श्रिता नो,
प्रीते तस्मिन् व्रजति रिपुरप्यात्मभावं क्षणेन ॥७८॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

यावत् कष्टं चिरमनशनात् सुव्रते ! ते बभूव,
तस्य प्रीत्यै कठिनतपसा नाधिकं कष्टमस्मात् ।
भेदस्त्वेवं चिरमनशनस्यायतिर्दुःखसारा,
देवोद्देश कठिनतपसः काम्यलाभेन शान्तिः ॥७९॥

चण्डि ! क्रोधान्मयि तव मतिः किन्नु मालिन्यमाप्ता,
येन श्रद्धां परिहृतवती देवतादौ परोक्षे ।
द्विष्टे पत्यौ मयि किमयशःकालिमानं समर्प्य,
सन्तापानप्यवधिरहितान् वैरशुद्धिं चकर्थ ॥८०॥

राधे ! क्व त्वं विहरसि शुभे ! पश्य मां सानुकम्पं,
नास्मि प्राच्यस्तव पतिरहं नूतनः कोऽपि जातः ।
त्वद्विच्छेदाज् ज्वलति हृदये दुःषहो दाववह्निः,
कान्ते ! शान्तिं प्रजनय सकृद् दृष्टिमार्गं ममाप्ता ॥८१॥

किं न्वाकाशे विहरसि निरालम्बना वायुभूता,
शास्त्रं मिथ्या न वदति ततः प्रश्न एवात्र नार्हः ।
शीघ्रं तस्मादुपसर शुभे ! वायुगत्यासहायं,
सद्मन्यस्मिन् जनविरहिते व्याकुलं मां त्वदर्थम् ॥८२॥

आस्तीर्णं मे सुविपुलमुरस्त्वत्सुखालम्बनार्थं
विन्देदं त्वं सति ! विजहती स्वाभिमानं पुराणम् ।
मुग्धे ! भीतिं परिहर गृहे सुप्तिमाप्ताः समस्ताः,
शोकेनार्त्ता विकलकरणाः केवलं मां विनास्मिन् ॥८३॥

कृष्णं सर्वं मम हृदकरोत् कृष्णरूपस्मृतिस्ते,
यातं रूपान्तरमिव पतङ्गं हि चिन्ता स्वशक्तोः ।
यावच्चिन्ता प्रसरति हृदो वृद्धिरेवासितिम्न-,
स्तत्तां चिन्तां सुविघटयितुं त्वं समक्षं समेहि ॥८४॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पूर्वं रूपं यदसितमभूत् तद् विदग्धं श्मशाने,
नूनं रूपान्तरमसि गता रूपहीनाथवा त्वम् ।
साक्षात्कारे गत उभयथा चित्तकार्ष्ण्यावकाशः,
प्रत्यक्षायास्तव तदसिताभावनिष्कम्पसिद्धेः ॥८५॥

रूपाभावाद् यदि न हि दृशा दृश्यतामेति वायु-,
र्दिव्यैश्वर्य्यात् सृज तदपरं कान्तकायं कृपालुः ।
संस्थानैक्यात्तव वपुरिति प्रत्यभिज्ञाय चित्ते,
घोरं दुःखं तव विरहजं देवि ! हास्याभि तस्मात् ॥८६॥

एवं रीत्या प्रणयिसविधे श्रूयते पूर्ववृत्त-,
स्नेहस्मृत्या प्रणयिनिवहाः स्वाकृतिं दर्शयन्ति ।
तस्मान्नेदं सति ! नवमहो भावि वृत्तं तवैव,
पूर्वक्षुण्णे पथि विचरितुं को विकल्पावकाशः ॥८७॥

साध्वीधर्मे चिरमवहितां त्वां मृतामीक्षमाणाः,
साध्वीलोकस्थितयुवतयस्तत्र ते सङ्गलोभात् ।
नूनं योग्यं वसतिसदनं वस्तुभिर्भिन्नरूपै-,
रद्यारभ्योपनतिदिवसं यावदाभूषयेयुः ॥८८॥

तस्मिन् लोके तव शुभगतिर्भाविनी निर्विकल्पं,
सोऽयं लोको बहुसुखमयत्वाच्च यद्यप्यहेयः ।
आशासेऽहं पुनरिह शुभामागतिं ते तथापि,
क्षीणे पुण्ये त्रिदिवनिलया मर्त्यभूमिं विशन्ति ॥८९॥

तस्मिन् काले स्वविभववशात् तत्र जातिं वृणीथा-,
ज्ञात्या यत्रोत्तरमसदृशं नावयोर्मेलनं स्यात् ।
अस्यां जातौ तव वचनतो यद्वदन्यां न यायां
तद्वन्नान्यामपरजननेऽप्यूढसंस्कारदार्ढ्यात् ॥९०॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

एवं राधास्मरणविकलो भावयन्नक्रमेण,
स्वापावेशादवशनयनः क्लान्तचित्तः क्षणेन ।
शय्यालग्नो व्यगमयदसौ सुप्तिकासेव्यमानः,
सर्वां रात्रिं विविधविषयस्वप्नधारानुवृत्त्या ॥६१॥

सर्वं कालं जलधिपुलिनं वीचिसङ्घैरिवासौ,
राधावृत्तैर्मनसि विततैस्तीव्रमुद्वेज्यमानः ।
भुक्त्वाशौचं विधिसमुचिताचारचारी दशाहम् ,
आशौचान्तादहनि विदधे श्राद्धमस्या द्वितीये ॥६२॥

निष्ठां याते परिहृतमहारम्भमावश्यकाङ्गैः,
श्राद्धे कृत्ये विरलविरले मन्दिरे बन्धुवर्गैः ।
आमन्त्र्य स्वं सुतमनुगतं विप्रदासः समूचे,
श्यामादासः पुनरपि गृहस्थाश्रमी साधनीयः ॥६३॥

आसील्लक्ष्मीरिव नववधूः सा गता भाग्यदोषात् ,
तस्या रिक्तं पदमसमयक्षेपमापूरणीयम् ।
गेहस्थित्यैव हि न मनुजः स्याद् गृहस्थाभिधानः,
सद्गेहिन्या यदि स सहितः सद्गृहस्थस्तदासौ ॥६४॥

श्रौताचारं कुलमनुगतं ये नराः पालयन्ति,
तैर्न स्थेयं कथमपि विनैवाश्रमं धर्मनिष्ठैः ।
श्यामादासो यदि परिणयं नैव कुर्यात् तदाद्य,
वानप्रस्थो यतिसमुचितो वाश्रमस्तेन गम्यः ॥६५॥

एवं वृत्ते विधिमतविधौ विप्लवः पीडयेन्नो,
यस्मात् तस्मात् परमिह कुले पिण्डनीरे न लभ्ये ।
पूर्वे वंश्याः स्युरतिकृपणाः क्षुत्तृषाभ्यां कृशाङ्गाः,
पैत्रं लोकं समधिवसतां नापरः पुष्टिहेतुः ॥६६॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रुत्वा तातोदितमिति वचः प्रश्रितो विष्णुदासः,
प्रोचे तातं भवदभिहितं तात ! सर्वं यथार्थम् ।
किन्तु प्राप्ता कथमपि मया सूचना मन्दिरान्तः
श्यामादासो न हि परिणयं संविधाता द्वितीयम् ॥९७॥

आकर्ण्यासौ तनयवचनं व्याहरद् विप्रदास,
एतत्तच्छं वदति दयिताशोकयुक्तस्तथादौ ।
आहूयैतं तदहमचिरादेव सामोपदेशैः,
शोकग्रस्तं परिणयविधौ स्वीकृतिं लम्भयिष्ये ॥९८॥

॥ इति पञ्चमो विलासः समाप्तः ॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

षष्ठो विलासः

तस्मिन् घस्रे विततगगनं सर्वमाक्रम्य पादैः,
सायं सूर्य्ये जलधिसलिलं गाहितुं सम्प्रवृत्ते ।
सायंकृत्यं विधिसमुचितं श्रद्धया साधयित्वा,
पौत्रं प्रीत्याह्वयदपजने स्वे गृहे विप्रदासः ॥ १
श्यामादासो विनयसहितस्तातातातं प्रणम्य,
तेनाज्ञप्तोऽभिमुखनिहितं पीठमध्यास्त तूष्णीम् ।
तं स प्राह प्रियतम ! किमप्यस्ति वाच्यं यतस्त्वां,
सम्प्रत्याकारयमवहितस्तत् समाकर्णय त्वम् ॥ २
त्वं मे वंशोज्ज्वलतममणिर्देवतानां प्रसादात्,
त्वामासीदं विबुधयशसा मण्डितं पुण्यलभ्यम् ।
शीलं शुभ्रं सितकरनिभं काम्यमासादयस्त्वं,
रूपे साक्षान्मनसिज इवाभासि सन्तर्पणोऽपि ॥ ३
शुद्धां बुद्धिं चिरमपि गतस्त्वं गुरूणां समीपे,
नम्रः कम्रो विहरसि सतां मुख्यदृष्टान्तभूतः ।
सन्तो नित्यं तव सुसदृशं कामयन्ते तनूजं,
कालो यस्मिन् घटयितुमलं न प्रभावं स्वकीयम् ॥ ४
पूर्वे वंश्या मम गुणगणैरन्वितं त्वां समग्रै-,
रस्मिन् वंशे धृतशुभजनिं वीक्ष्य तोषं प्रपन्नाः ।
त्वां गार्हस्थ्याश्रममपि गतं ते पुरा दृष्टवन्तः,
पिण्डाद्याशामुदितमनसो नूनमासाम्बभूवुः ॥ ५
आशा चित्त मम पदमधात् पौत्रपुत्रादिवर्गैः,
क्रीडाधाराकृतबहुसुखैरेव कालं नयेयम् ।
तेषां चित्तेप्सितशतदृढप्रार्थनाभिश्च नित्यं,
मोदं स्वर्गादपि समधिकञ्चाभिविन्देय चित्ते ॥ ६
तेषां हर्षान्मनसि विपुलं हर्षमासादयेयम्,
दृष्ट्वा तेषां स्मितमनुभवेयञ्च राकाप्रकाशम् ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वक्त्रं दृष्ट्वा कथमपि समुत्पन्नमालिन्यलेशं,
घोरध्वान्ते विकलमनसो मज्जनं भावयेयम् ॥ ७

दूरे तेषां रुदितरसितं वज्ररावेण तुल्यं,
चित्ते घोरं समुपजनयेद् विप्लवं मे पुरस्तात् ।
तेषां क्रीडाविधिषु लगतां बन्धुवर्गाभियोगे,
ज्ञातं दोषं गुरुमपि महापक्षपातेन जह्याम् ॥ ८

तेषां विद्याधिगमसमये स्वल्पमात्रप्रकर्षं,
दृष्ट्वा चित्तं स्वरधिकसुखं प्राप्य नृत्यं वृणीयात्
क्रोडे कृत्वा वदनकमले चुम्बनं लम्भयित्वा,
वारं वारं निजमतिसुखं तानहं वेदयेयम् ॥ ९

विद्यागारं परिहृतगृहेष्वेषु नित्यं गतेषु,
मन्येय स्वं खलु गृहमिदं तद्वियोगेन शून्यम् ।
विद्यागारादथ नियमतो मुक्तिमासाद्य तेषु,
गेहायातेष्वखिलभवनं पूर्णमालोकयेयम् ॥ १०

लब्ध्वा पूर्वं सुरकरुणया त्वां शिशुं बाल्यकाले,
यद् यत् सौख्यादिकमुपगतो येन येनाहमेषः ।
बाल्योत्तीर्णे त्वयि पुनरतिप्रेयसस्त्वत्प्ररोहात्,
तत् तत् सौख्यादिकमतितृषा भीक्तुमासीद्धृदो मे ॥ ११

शोकस्थायिन्यपि हि करुणे या रसे सौख्यसीमा,
तद्वत् तत्रासुखमपि सुखेनैव पूर्णं विभाति ।
तस्मात् कालोद्गतविरहजं दुःखमप्यस्ति काम्यं,
यस्माद्युक्ता मिलनविरहाः सर्व एवेप्सिता मे ॥ १२

भाग्यात् पौत्रं समधिगतवांस्त्वां यथा पुत्रतुल्यं,
तद्वत् पौत्रप्रकृतिरनघो जायतां मे प्रपौत्रः ।
एतत् काम्यं मनसि नियतं ध्यायतो मे विशेषाद्,
राधां दैवादनुपमगुणामानयस्त्वं वधूटीम् ॥ १३

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सा सद्वंश्या विबुधतनुजा बालिकास्मिन् निशान्ते,
शीलैः सर्वानधिकृतवती मूर्त्तिमाप्रेव लक्ष्मीः ।
तस्मात् सर्वां मम हृदयजां वासनां पुष्टिमाप्ता,
दुर्दैवं नासहत सुतरामप्रतीकारघोरम् ॥ १४
तद्दौरन्त्यात् तव सुचरितस्यापि तस्यां विरक्तिः,
कन्ना राधा समजनि ततो जीवने निर्व्यपेक्षा ।
त्यक्ताहारा परिहृतसुखा सुप्तिमुक्ता सचिन्ता,
क्षीणक्षीणा तदनु विजहौ जीवनं स्वं सहेलम् ॥ १५
तस्याः पारत्रिकविधिरथो वैधरीत्या व्यधायि,
स्वर्गे शान्तिं चिरमुपगता वर्त्तां सा वराकी ।
एते तस्याः स्वजननिवहा मन्दिरे तद्वियुक्ते,
स्थित्वागत्या चिरमिह परं दुःखमासादयेयुः ॥ १६
अस्मिन् घोरे विषमलहरे वत्स ! दुःखाम्बुराशा-
वेकं योग्यं शरणमधुना बान्धवानां त्वमेव ।
राधातुल्यां वृणु गुणवतीं काञ्चिदन्यां सुरूपां,
रिक्तं राधापक्षमुपगता या विदध्यादरिक्तम् ॥ १७
एव तस्याः प्रियगुणगणैश्चित्तहारिश्रिया च,
मुग्धा राधास्मृतिजनि जना दुःखमेते विजह्युः ।
तत्त्वं हित्वा मनसि निचितं दुःखतल्पं विकल्पं,
स्तुत्ये कृत्ये प्रवितर निजां सम्मतिं सम्मुदे नः ॥ १८
वृद्धस्तेऽहं जनकजनकः स्नेहवान् सर्वकालं,
त्वन्मङ्गल्यं विधिमविरतं चिन्तयाम्यप्रमत्तः ।
अक्षेमन्ते मितमपि मनस्यूहमानो बिभेमि,
हर्षोत्फुल्लस्तव हितकथाभावनातो भवामि ॥ १९
तन्मामेवं तव हितरतं बान्धवं चिन्तयित्वा,
वृद्धं तातं पितुरथ किलालङ्घ्यवाचं गुरुं वा ।
कामं चित्तानभिमतमपि त्वं विदध्या विधानं
दुःखं तुच्छं गणयति सदा सज्जनो नीतिरक्षी ॥ २०

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्यामादासस्तदनु विनयानम्रवक्त्रो न्यगादीद्,
आर्य्य ! स्नेहं न हि न भवतो वेद्मि नित्यप्रकाशम् ।
जानामि त्वां परमगुरुमप्येष दुर्लङ्घ्यवाच-
मेकं किन्तु व्यसनमसमं तत्र मां सन्निरुन्धे ॥ २१

यावत्तस्याश्वरमसमयः प्रार्थितस्तावदस्यै,
प्रत्यश्रौषं 'न खलु दयितां काञ्चिदन्यां वृणीयाम्' ।
तत् किं कुर्य्यां कथयतु भवान् सम्प्रतिश्रुत्य किञ्चिद्,
अन्याय्या किं नहि तदकृतिस्तद्विरुद्धा कृतिर्वा ॥ २२

श्यामादासस्तदनु कथितो विप्रदासेन वत्स !
किं ते वस्तुद्वयपरिगतं तारतम्यं विभाति ?
भूयो दाराग्रहणमपि च स्वप्रतिश्रुत्यपाय,
एते तावत् स्थिरतमधिया पश्य सम्यग् विचार्य्य ॥ २३

दोषो यस्मिन् गुरुरतितरामन्यतः संविभायात्,
तत् सन्त्याज्यं लघुरथ यतस्तन्न हेयं कदाचित् ।
भूयोदाराग्रहणमिह ते भूरिदोषं विमायाद्,
हेयं तस्मात् तव भवति तन्नूनमादेयमन्यत् ॥२४

भूयोदारग्रहणविधिना स्वप्रतिश्रावभङ्गे,
स्वल्पं पापं भवति च ततः कर्त्तुरेकस्य दुःखम् ।
भूयोदारग्रहणविरतौ वंशधाराविलोपात्,
पिण्डालाभात् सलिलविरहाद् भूयसां कष्टभोगः ॥२५

एवं रीत्या कृतियुगगतं तारतम्यं विचार्य्य,
मिथ्यावादादिरपि विहितः शास्त्रकारैः कदाचित् ।
तत्त्वं धीमानुचितमुभयोस्तारतम्यं विविच्य,
गृह्णीष्वैकं यदपरमतापेक्षया स्वल्पदोषम् ॥२६

तस्माद् दारग्रहणमुचितं ते न तस्मान्निवृत्तिः,
कर्त्तव्येषु स्वहितहृदसन्वादृशाः शीलवन्तः ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

स्वीकृत्येदं स्वजननिवहान् दुःखमुक्तान् विदध्याः,
पूर्वान् वंश्यानपि सुखमयान् काम्यसम्भावनेन ॥२७

श्यामादासोऽवददथ महामान्य ! तातस्य तात !
क्षौरीं धारामिव सुनिशितां तावकीनां मनीषाम् ।
स्वप्नेऽप्यास्ते किमभिभवितुं शक्तिरालोलबुद्धेः,
किं नक्षत्रं मिहिरकिरणं तेजसा जेतुमीष्टे ॥२८

ज्ञात्वाप्येवं चपलचपलो मूकतां नाश्रयिष्ये,
येनानुक्तं जनयति शुचं वक्तुमिष्टं समेषाम् ।
क्षन्तव्यं मे गुरुतरमतश्चापलं बालयोग्यं,
युक्तिः शुद्धिं न भजति विदां सन्निधावप्रयुक्ता ॥२९

काम्योपाये बलवदहिताहेतुतायुक्तमिष्ट-
हेतुत्वश्चेद् भवति विदितं तर्हि तत्र प्रवृत्तिः ।
हेतुत्वं वा भजति हि कृताविष्टहेतुत्वबुद्धिः,
सूते बाधां बलवदहिताधायकत्वावबोधः ॥३०

क्षीरं पीतं जनयति हितं सत्यपीत्थं विचारे,
ज्ञात्वा को वा विषमयमिदं सम्प्रवर्त्तेत पातुम् ।
को वा विज्ञो मधु घृतयुतं पातुमेति प्रवृत्तिं,
कार्यो यत्नः किमु फणिमणिं सर्पशीर्षाद् ग्रहीतुम् ॥३१

इष्टानिष्टे न खलु नियते प्राणभाजां समेषां,
यत् स्यादिष्टं मम नहि परस्यापि तत् स्यादभीष्टम् ।
यद् यस्येष्टं स तदनुगुणे सम्प्रयाति प्रवृत्तिं,
यच्चानिष्टं तदुपजनने याति नूनं निवृत्तिम् ॥३२

भूयोदारग्रहणविधिना भावि भव्यं यदुक्तं,
राधास्मृत्या तदिदमयते नेष्टभावं हृदो मे ।
जीवन्तीं तां विविधविधयोपेक्षितां बुद्धिदोषा-,
न्नेतुं नालं कथमपि मनस्तापमद्यापि कृत्या ॥३३

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

भूयो दारग्रहणविधिना यां ग्रहीष्यामि बालां,
तस्यां द्वेषो यदि पुनरहो पूर्वदोषानुवृत्तिः ।
तस्यां रागो यदि सुविपुलं तापमेषा प्रगन्ता,
का वा बाला जगति सहते कान्तरागं सपत्न्याम् ॥३४

भार्य्यामन्यां न खलु मनसाप्येष भोः संग्रहीष्ये,
संकल्पोऽयं मम दृढतमो नैष आर्य्येण भेद्यः ।
भार्य्या पत्यौ सुरपुरगते ब्रह्मचर्य्यं वृणीते,
तस्या नाशे पतिरपि कथं ब्रह्मचर्यं न यायात् ॥३५

शास्त्रादेशो यदि न पुरुषैर्ब्रह्मचर्य्यानुवृत्ति,
भार्य्यानाशे कठिनकलिना साधनीया जगत्याम् ।
तन्नापेक्ष्यः स इह सुतरां पक्षपातेन दुष्टः,
शास्त्रं दुष्टं यदि क इह वा लोकवाक्याद् विशेषः ॥३६

भार्य्या वन्ध्या यदि नहि ततो भाविनी वंशरक्षा,
जाताः पुत्रा अपि कुचरिता नास्तिकाश्चेन्निरर्थाः ।
भूत्वा भूत्वा यदि यमवशं यान्ति किं तावदेतै,
र्दारासत्तावपि नहि ततः पैत्र्यपिण्डादियोगः ॥३७

मन्ये धातुर्नहि मतमिदं स्यामहं यद् गृहस्थः,
नो चेत् कस्मादघटयदसौ हन्त राधाविपत्तिम् ।
अन्यां हन्ता न स इह च कः प्रत्ययस्तातताततात !
नो निर्णीतं कुशलमिह यत् तन्निवृत्तिः प्रशस्ता ॥३८

किञ्चान्यस्याः परिणयविधौ साधिते युष्मदिष्टे,
सा स्याद् दैवाद् यदि वत हता बह्वपत्या पुरस्तात् ।
तत्तोकानां सुपरिचरणव्यापृतस्य प्रकामं,
स्यान्मे सर्वो विधिरवसितः कीर्त्तिहेतुः पृथिव्याम् ॥३९

तन्मे मुक्तिर्यदि करुणया साधिताभूद् विधात्रा,
तत् किं यत्नात् पुनरिह मुधा बन्धनेनाहितेन ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

आत्मत्राणे किल गतिरियं दर्शिता वेधसा मे,
तां चेद् जह्यां करतलगतक्षेमहन्ता तदा स्याम् ॥४०

इत्थं युक्तिप्रचयकलितां पौत्रवाचं निशम्य,
प्रज्ञावन्तं सुदृढमनसं विप्रदासस्तमूचे ।
वत्स ! प्रेयानसि समुचितां वाचमेव ब्रवीषि,
प्रज्ञावत्त्वं प्रकटितममूद् यत्र ते भूरिमात्रम् ॥४१

यद्यप्येवं मतिमुपचितां विन्दसे त्वं तथापि,
प्रज्ञा नाम्ना परिणतिमसौ बालभावे स्थितस्य ।
नानादोषप्रतिभयवशाद् यत्र भार्य्यां वृणीषे,
भिक्षोर्भीत्या तदनुकुरुते शस्यरोपान्निवृत्तिम् ॥४२

भव्यं सम्भाव्य हि जनगणो याति कृत्ये प्रवृत्तिं,
सर्वत्रैव प्रसरति परं नैव भव्यं भवेऽस्मिन् ।
सोऽयं यत्नं परिहरति किं कर्मजाते कदाचिद् ,
भूयोदारग्रहणविषये तत् प्रवृत्तिं वृणीथाः ॥४३

बालोऽसि त्वं नहि समुचितं तेऽद्य रागग्रहणं,
काले दध्याः प्रयतमनसा बन्धयोगे विरक्तिम् ।
त्वं मे पौत्रः परमगुरुरप्यस्म्यहं ते प्रभावी,
भार्य्यां विन्देत्यनुमतिरतो न त्वया मे प्रहेया ॥४४

देवो विष्णुः प्रतिदिनमहो पूजितो भक्तिपूर्वं,
श्रीश्रीचण्डीस्तुतिरपि शतावृत्ति नीता प्रपाठम् ।
तत्साफल्यं समजनि यथा जन्मना तावकेन,
तद्वद् भूयात् कुलधरपरापत्यसन्तानसृष्ट्या ॥४५

श्रुत्वा पैतामहमथ वचो जोषमासीद् विनीतः,
श्यामादासः क्षितिनिखननव्यापृतो नम्रवक्त्रः ।
मत्वा मौनं प्रकृतविषये सम्मतेर्लक्ष्मभूतं,
चित्ते हर्षं दधदतितरां विप्रदासो बभाषे ॥४६

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitized by eGangotri/Sarayu Trust

वत्स ! प्रीतस्तव सुचरितैरस्म्यहं सर्वकालं,
स्वस्त्यास्तां ते व्रज निजगृहं नास्ति मे वाच्यमन्यत् ।
श्यामादासस्तदनु मनसा भावयन् भूरि मन्दं,
वाह्यज्ञानाच्च्युत इव निजं गेहमेव प्रतस्थे ॥४७

गत्वा गेहं शयनमभजद् विह्वलात्मा तदासौ,
वात्यावेगो मनसि विकले प्रावहद् घोररूपः ।
हा हा किं वाकरवमहितं मौनवृत्तिं गतोऽहं,
यस्मात् पैतामहमतिमिता सम्मतिर्मे विवाहे ॥४८

अस्मादूर्ध्वं मम परिणये यत्नधारां स कर्त्ता,
तद्व्याघाते विनयविलयः स्वीकृतौ धर्महानिः ।
तस्माद् गेहादपसृतिभृते नास्ति गत्यन्तरं मे,
कालक्षेपो न च हितकरः कृत्यमद्यैव साध्यम् ॥४९

स्नेहं पैतामहमगणयंस्तातमात्रादिदुःखं,
स्वस्यापाये लघु तृणसमं मानसे मन्यमानः ।
ज्ञात्वा सुप्तं निलयमखिलं त्यक्ततल्पः सशङ्कं,
मन्दं मन्दं निरगमदसौ मन्दिराद् बन्धुहीनः ॥५०

तद् दृष्ट्वा किं सपदि कुररी तालवृक्षे शयाना,
सुप्तान् सञ्जागरयितुमहो तारमाक्रन्दति स्म ।
रात्रिः किं वा तिमिरमलिना दीप्रनक्षत्रनेत्रैः,
संपश्यन्ती किशलयकरा तं स्वकृत्वान्न्यषेधत् ॥५१

श्यामादासो बहिरुपगतो भूमिलग्नोत्तमाङ्गः,
प्राज्यैः सिञ्चन्नयनसलिलैर्जन्मभूमिं ननाम ।
मातर्जन्मावनि ! तव परित्यागदोषं क्षमस्व,
गत्या हीने मयि कुरु कृपामित्युदीर्य्यादतिष्ठत् ॥५२

अम्बां तातं जनकजननीं तातताताश्च पूज्यं,
स्मृत्वा बद्धाञ्जलिरपि बहु क्षान्तिमार्त्तो ययाचे ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

मिथ्या देवार्च्चनमजनि वो मत्कृते प्रस्तुतं यद्,
यस्माज्ज्ञातो न खलु भवतां किञ्चिदिष्टं करोमि ॥४३

गेहोद्यानस्थित-खगकुलव्याकुलारावयोगै-,
मुञ्चन् दीर्घश्वसितमटता सोष्मणा मारुतेन ।
हस्तोत्क्षेपं प्रचलदनिलोत्क्षिप्तशाखाप्रतानै-,
र्घोरं दुःखं प्रियविरहजं सूचयामास वासः ॥५४

गेहोद्यानप्रभवतरवः पल्लवैर्वातधूतै,
रक्ताकारैरिव करतलैस्तं न्यषेधन्नभीक्ष्णम् ।
श्यामादासस्तदिदमखिलं वस्तु मत्वा तृणाय,
वासं दूरे विजहदचलत् स्वप्रियायाः श्मशानम् ॥५५

तस्योपान्ते क्षणमुपविशन् विष्वगङ्गारभाजो,
भग्नं कुम्भं ह्युरसि दधतो वंशदण्डद्वयञ्च ।
निस्तब्धत्वाद् भयमिव मनस्यादधानस्य गाढं,
श्यामादासो विकलमनसा तन्न राधां जुहाव ॥५६

राधे ! दग्धा त्वमसि विधिनात्रैव पुण्ये श्मशाने,
देवीभूयं स्वमहिमवशादेव नूनं गतापि ।
अस्थि प्राज्यं यदिह लसितं देवि ! दग्धावशिष्टं,
तत् संश्रित्य प्रणयवचसा मां कृतार्थीकुरुष्व ॥५७

प्रत्यश्रौषं यदहमवले ! पूर्वतस्त्वत्समीपे,
तद्रक्षार्थं प्रियमपि निजं देशमेष त्यजामि ।
माता तातो जनकजननी तातातातः प्रियो मे ;
सर्वे दूरे वत परिहृता रक्षितुं तत्प्रतिज्ञाम् ॥५८

राधे ! दुःखं मम परमिदं दूरतः प्रस्थितस्य,
यत् सायाह्ने प्रतिदिनमहं तावकीनं श्मशानम् ।
लब्ध्वा पुण्यस्मृतिरचनया नालमाप्तुं सुखं स्यां,
सान्निध्यं ते पितृवनजुषो देवि ! सम्भाव्य चित्ते ॥५९

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

नात्र स्थातुं समयमधिकं शक्नुयामिच्छयापि,
नश्येत् कृत्यं मम गुरुजनैरेत्य चेद् बाधितः स्याम् ।
आपृच्छे त्वां पितृवनगतामस्थिचूर्णावशेषाम्,
आशीर्वादं विसृज कृपया देवि ! काम्ये मदीये ॥६०

राधे ! देवि ! प्रकुरु विभवादाशिषं मे द्वितीयां,
त्वद्देहाश्ना सह मिलतु मे दग्धदेहास्थिशेषः ।
राधानामप्रजपनपरः क्वापि तीर्थे वसेयम्,
आराध्या मे न खलु भविता देवतान्या कदाचित् ॥६१

इत्याभाष्य प्रमथितमना बाष्पधारां विमुञ्चन्,
भूयो भूयः पितृवनभुवं सम्परावृत्य पश्यन् ।
वामे वाते तरिमिव बलान्मन्दमन्दं तनुं स्वां,
श्यामादासः कथमपि समाकृष्य दूरं प्रतस्थे ॥६२

ध्वान्ताक्रान्ते स्खलितचरणं ग्राममार्गे प्रसर्पन्,
मन्दं मन्दं दृढतरमनस्कामसम्प्रेषितात्मा ।
कष्टं लब्ध्वाप्यधिकमधिकं नो परावृत्तिमापत्,
स्वीये कृत्ये सुदृढमनसां नोद्यमो याति भङ्गम् ॥६३

ग्रामं हित्वा निविड़तिमिराक्रान्तमार्गं क्रमेण,
कष्टं ग्रामाद् नैवं बहिरतिबृहत् प्रान्तरं स प्रपेदे ।
यस्मिन् मुक्ते क्षितिरुहवरैरल्पमार्गप्रकाशे,
श्यामादासोऽस्खलितचरणं शीघ्रमेव प्रतस्थे ॥६४

गत्वा गत्वा त्वरितममुना निम्नगा कापि दृष्टा,
या तद्गम्यां दिशमभि रयेणावहत् स्वल्पकाया ।
श्रित्वा तस्यास्तटमथ ययौ बन्धुरं सातिकष्टं,
क्वापि क्षेत्रस्तु तजलमयं क्वापि काशादिरुद्धम् ॥६५

मार्गे तस्मिन् विषमविषमे गच्छतस्तस्य घोरं,
कष्टं जानन्निव निजकरैस्ततप्रनाशाय सूर्य्यः ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्राच्यां प्रोद्यन् रजनिविगमे दर्शयामास मार्गम् ,
अन्यस्यार्त्तिप्रशमनकृते साधवो वै यतन्ते ॥६६

श्यामादासे गुणवति परं रागमाधाय रक्त-,
स्तद्दुःखाय प्रसृतमभितस्तामसं सम्प्रहृत्य ।
आर्त्त्यार्त्तिप्रशमनवशात् कीर्त्तिमासाद्य शुभ्रां,
शुभ्राकारः समजनि रविः शून्यमार्गे क्रमेण ॥६७

जाड्यान्मुक्तो रजनिजनिताद् भानुभानुप्रतानै-,
र्गेहादत्यन्तरगमनधाजातभीत्या च मुक्तः ।
मध्ये मध्ये कृषिधनजनोद्वीक्षितोत्साहसीमः,
श्यामादासो लघु मधुमतीं निम्नगां सम्प्रपेदे ॥६८

भङ्गैर्भीमामथ स तटिनीं तां विशालप्रणाहां,
दृष्ट्वा भीतः समजनि परं काम्यसिद्धौ हताशः ।
एषा भीमा सरिदतिरया दुस्तरा नास्ति यानं,
किं तत् कुर्य्यामिति चलहृदा चिन्तयामास तावत् ॥६९

श्यामादासस्तटपरिगतः कृत्यमूढस्तदानीं,
भक्त्याविष्टः किल मधुमतीं स्तोत्रवाचा ववन्दे ।
नौकां चैकां पुलिनमिलितां दैवयोगाद्ददर्श,
या तस्याभूदसमशरणं निम्नगापारयाने ॥७०

स्तुत्या तुष्टा किमु सरिदहो दर्शयामास नौकां,
किं वा जन्मान्तरचितमहापुण्यपाको ममायम् ।
किं वा नित्यार्चितमुरहरस्यानुकम्पा किलैषा,
लोकातीतं किमपि घटते लोकबाह्याद्धि हेतोः ॥७१

कुर्वन्नेवं त्रिविधविषयं विस्मितः सन् विकल्पं,
भूयो भूयः सविनयमुपामन्त्र्य तत्कर्णधारम् ।
भक्त्यावेशान्मुरहरमनुस्मृत्य राधाप्रियं स,
स्मृत्वा राधामपि मधुमतीं तत्तरण्योत्ततार ॥७२

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तस्मिन्निष्टाधिगममुदिते तीरदेशावतीर्णे,
दृष्टेर्वाह्या समभवदसौ तत्क्षणेनैव नौका ।
श्यामादासः समुदितमिदं मायिकं संविचिन्त्य,
नत्वा देवीमिव मधुमतीमाप गन्तव्यमार्गम् ॥७२

नाना क्षेत्राण्यथ बहु पुरग्राममुत्तीर्य्य यत्ना-,
न्नानोपायैरपि च सरितां प्राप्य पारं स तावत् ।
गत्वा गत्वा कतिपयदिनान्यापदापद्विमुक्तः,
कालीकेतं नगरमवरं भूरिलोकप्रचारम् ॥७४

नानाकोलाहलमुखरिते भूरिहट्टादिजुष्टे,
नानारूपव्यसनघटनादप्रिये कष्टचारे ।
रथ्यापार्श्वप्रविततपयोनालिकागन्धदुष्टे,
पानायोग्यामयकरजलापूर्णवापीप्रपञ्चे ॥७५

तैलालोकैः कथमपि निशि व्याहताल्पान्धकारे,
प्रान्ते प्रान्ते घनवनलसद्वन्यजन्तुप्रताने ।
संस्काराणां विरहवशतो भूरिदुर्गन्धयुक्ते,
तस्य प्रीतिर्नहि समभवत्तत्र वासप्रबन्धे ॥७६

यद्यप्यस्मिन् वहति सुतरां पावनी जह्नुकन्या,
यद्यप्यास्ते कलुषशमनी कालिका शर्मदात्री ।
नाना दोषैरिह नहि सतां चित्तसक्तिस्तथापि,
तस्मात्त्यक्त्वा स नगरमिदं श्रीनवद्वीपमापत् ॥७७

श्रीगौराङ्गः कलिकलुषहृद् यत्र देहं गृहीत्वा,
नामब्रह्मामृतमुपहरंस्तारयामास जीवान् ।
यस्मात् पूता सुरसरिदिव प्रस्रुता प्रेमभक्ति-,
र्मानं मोक्षादपि समधिकं प्राप भक्तप्रपञ्चे ॥७८

यस्मिन् देवायतननिवहा भक्तवृन्दैरुपेताः
प्रातः सायं किल मुखरिताः शङ्खघण्टादिनादैः ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पूता यस्मिन् विदधति दिशो नामसङ्कीर्त्तनानि,
दूरे यस्मादकृत वसुतिं भोगवाञ्छा भयार्त्ता ॥७९

श्रीगौराङ्गः प्रतिजनमुखे यत्र नाम्ना चचार,
राधाश्यामेत्यभिमतपदं श्रूयते यत्र नित्यम् ।
पूता गङ्गा प्रवहति पदं क्षालयन्ती यदीयं,
सर्वक्षौणीतलपरिचितो येन वङ्गप्रदेशः ॥८०

यस्मिन् वृन्दावन इव रतिः शाश्वती वैष्णवानां,
शास्त्रज्ञानामृतरससमास्वादने चोत्सुकानाम् ।
शास्त्रज्ञानं मिलितमभवद् यत्र धर्मेण सार्द्धं,
प्रेयोगन्धागमजनि यतो गौरवं हेम्नि भातम् ॥८१

आच्छिद्य वाधिगुणमिथिलापत्तनात् पत्तनं यद्,
वव्रे विद्यागुरुपदमिलरत्नभूतं क्रमेण ।
तस्मिन्नध्यापन-बहुविधग्रन्थनिर्माणमुख्यैः,
कृत्यैः सत्यं समुचितमभूत् सर्वविद्यागुरुत्वम् ॥८२

श्यामादासः स नगरमिदं प्राप्य हृष्टान्तरात्मा,
स्थित्वा तस्मिन् कतिपयदिनान्येव देवालयादौ ।
विद्याप्रेम्ना विपुलयशसः कृष्णचन्द्रान्वयस्य,
पूते गङ्गातटपरिसरे स्थास्नुवासं चकार ॥८३

संख्यातीतं स समुपदिशन् शास्त्रविद्यार्थिवृन्दं,
धर्म्याचारो विषयविमुखो दीर्घकालं निनाय ।
पुण्यस्नानं प्रतिदिनमसौ गाङ्गतोये विधाय,
राधा राधेत्यभिमतपदं मन्त्रवत् संजजाप ॥८४

विद्यासक्त्या गुरुमिव गुरुं प्रत्यहं संप्रपेदे,
मध्वासक्त्या मधुपगणवत्तं सुविद्यार्थिसङ्घः ।
विद्यावादैरतिमुखरितस्तस्य विद्यानिकेतः,
स्वल्पैर्वर्षैः समजनि नवद्वीपकीर्त्तेः पताका ॥८५

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

यातेष्वेवंविधविधिजुषो नैकसंवत्सरेषु,
राधानाम्नो जपविधिरधाद् वृद्धिमैकान्तिकत्वात् ।
तस्याखास्थ्यं वपुरुपगतं स्वास्थ्यमाध्यस्थ्यहेतोः,
पित्तश्लेष्मज्वरपरिगतस्तल्पमेवाश्रितोऽसौ ॥८६

निद्राहारौ विजहदखिलस्तस्य विद्यार्थिसङ्घः,
सेवां तस्याकुरुत नियतं भक्तिसिक्तान्तरेण ।
रोगः किन्तु क्रमश उदगान्निष्फलाभूच्चिकित्सा,
श्यामादासोऽप्यहितमचिरादात्मनो भावि मेने ॥८७

शय्यापार्श्वे प्रियमथ समाहूय विद्यार्थिवृन्दं,
श्यामादासः कथमपि वचः स्वल्पकं व्याजहार ।
स्वस्त्यास्तां वः प्रियतमसुता ! दूरमेव प्रतिष्ठे,
द्वारे पश्याम्यहमिह यमं प्राप्तकालव्यपेक्षम् ॥८८

यूयं पुत्रा मम चिरमहं ज्ञानदाता पिता वो,
याचे प्राणोत्क्रमणसमये दक्षिणां काञ्चिदद्य ।
देहं त्यक्त्वा गतवति बहिर्मामकप्राणवायौ,
नेयः कायो मम किल पुरं वङ्गजं कोट्टलाख्यम् ॥८८

तस्मिन् सिद्धे मम जनिपदे विष्णुदासस्य गेहे,
राधाया मे सुरपुरजुषो धर्मपत्न्याः श्मशाने ।
दाह्यो देहो मम कृतिरियं दक्षिणा वः समग्रा,
शान्तिर्नो मे ध्रुवमपरथा लोकमन्यं गतस्य ॥९

एवं वाचं मृदु विसृजतस्तस्य भावान्वितस्य,
स्वीकारोक्त्या स्मितमुखजुषस्तत्र विद्यार्थिनाञ्च ।
नाभिश्वासश्चरमसमयं प्रावहत् सूचयित्वा,
शिष्यैर्येन त्रिदशसरितः प्रापितस्तीरमेषः ॥९०

एषा गङ्गा मरणमिह मे ज्ञानमेवं श्रितस्य,
प्राप्तः प्राणोत्क्रमणसमयो गाङ्गभङ्गाप्लुतस्य ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

नान्यश्राव्या समजनि तदाकस्मिकी दैववाणी,
श्यामादास ! त्यज हृदि चिरं सञ्चितं तीव्रतापम् । ९१

मन्दाक्रान्त्या पतिरतिहितं नाप राधा सबाधा,
मन्दो हेतुस्तदहितकृतौ नासि दोषी तत्त्वम् ।
राधा राधेत्यनुदिनजपात् सिद्धिमाप्तं तपस्ते,
राधालोकं श्रय निरुपधिप्रेमतत्त्वप्रशान्तम् । ९२

श्रुत्वाकस्माद् गगनजगिरं वक्त्रमस्य प्रसन्नं,
स्वान्तं शान्तं विलयमगमत् प्राक्तनी प्राज्यलज्जा ।
शान्त्या प्राणोत्क्रमणमभवद् व्याकुलाः शिष्यसङ्घाः,
शोकारावैः प्रतिरवमयं व्यादधुर्गाङ्गभङ्गम् । ९३

प्राप्ते किञ्चित् प्रशमनमथो शोकभारानुबन्धे,
स्मृत्वा वाचं गुरुनिगदितां तत्र निष्कम्पभक्त्या ।
अष्टौ शिष्याः सुदृढतनवो भेषजाभ्यक्तदेहं,
स्कन्धे कृत्वा गुरुमभिमतान् पूर्ववङ्गानभीयुः ॥९४

नानाहेतुप्रभवममितं कष्टमुत्तीर्य्य दैवात्,
स्वेषां भक्तिप्रवणमनसाञ्चापि बुद्धिप्रभावात् ।
प्राणैर्हीनां गुरुशवतनुं भक्तियुक्ता वहन्तः,
शिष्याः प्रापुः सुचिरसमयेनेप्सितान् पूर्ववङ्गान् ।९५

पृष्ट्वा पृष्ट्वा किल समगमन् पत्तने कोट्टलाख्ये,
श्यामादासोदितमभिमतं विष्णुदासस्य गेहम् ।
यद्गेहस्थाः प्रययुरखिला एव तावद् द्युलोकं,
घोरारण्यं प्रतिभयमयं केवलं तत्र दृश्यम् ॥९६

ते राधायाः पितृवनभुवं लोकवक्त्राद् विदित्वा,
तस्यां दग्ध्वा गुरुशवतनुं दक्षिणादानधन्याः ।
पौरैर्हूताः प्रणयवचसा तद्दिनं तत्र नीत्वा,
प्रत्यायाताः पुनरपि नवद्वीपभूमिं सशोकम् ॥९७

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तद्दम्पत्योः पितृवनपदं पत्तने कोटटलाख्ये,
तीर्थीभूतं गणितमभवत् पौरसङ्घः समग्रैः ।
जायापत्योः प्रणयमहिमव्यञ्जनार्थं समन्तात्,
पौरास्तस्मिन् व्यदधुरविरान्मन्दिरं भूरिचूडम् ॥९८

नाम्ना सिद्धं तदिदमभवद् 'दम्पतिप्रेमतीर्थम्',
ग्रामे ग्रामे मनुजवदनेष्वायतं वृत्तमेतत् ।
मार्गे यान्तः पथिकनिवहा मन्दिरस्थाधिदेवीं,
भक्त्या नत्वा सुरनतिभवं शर्म सम्भावयन्ति ॥९९

॥ षष्ठो विलासः समाप्तः ॥

समाप्तमिदं

कश्यपमहाकवि—महामहोपाध्याय—श्रीकालीपदतर्काचार्य्य—प्रणीतं
मन्दाक्रान्तावृत्तं नाम खण्डकाव्यम् ।

—०—

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१९७१ खृष्टाब्दकालं यावत्
महामहोपाध्याय-तर्काचार्य्यकृता ग्रन्थमाला।

साहित्यग्रन्थाः—

१। अनुबादनबोदयः, (संस्कृतानुवादशिक्षाग्रन्थः—'संस्कृत वुक् डिपो' प्रकाशितः)

२। काव्यचिन्ता, (कबि-काव्यसमालोचनाग्रन्थः—छात्रपुस्तकालय-प्रकाशितः)

३। स्यमन्तकोद्धारः (संस्कृतव्यायोगः—प्रणवपारिजात-संस्कृत-पत्रिका-प्रकाशितः)

४। नलदमयन्तीयम्, (संस्कृतनाटकम्,—संस्कृतसाहित्यपरिषदा प्रकाशितम्)

५। प्रशान्तरत्नाकरम्, (संस्कृतरूपकम्,—संस्कृतसाहित्य-परिषदा प्रकाशितम्)।

६। माणबकगौरवम्, (संस्कृतरूपकम्—सं-साः-पः-प्रकाशितम्)।

७। सत्यानुभावम्, (संस्कृतमहाकाव्यम्—सं-साः-पः-प्रकाशितम्)।

८। योगिभक्तचरितम्, (श्रीश्रीनगेन्द्रमठ-प्रकाशित्काव्यम्)

९। महानाटकटीका, (आंशिकी, 'संस्कृत वुक डिपो' प्रकाशिता)

१० विष्णुप्रभा, (बिष्णुपुराणटीका, सत्यधर्म्मप्रचारसङ्घेन सनातन-शास्त्रपत्रिकायां प्रकाशिता)।

११। गीताप्रतिच्छाया, (श्रीमद्भगवद्गीतायाः 'ब्लांभार्स' इत्याख्य-नवीनच्छन्दसा मूलानुरूपः वङ्गभाषानुवादः, देवयानपत्रिका-प्रकाशितः)

१२। श्रीश्रीचण्डीप्रतिच्छाया, (ब्लांभार्स छन्दसा मार्कण्डेयचण्डी-ग्रन्थानुवादः, सुदर्शनपत्रिकायामंशेन प्रकाशितः)

१३। आलोकतिमिरवैरम्, (खण्डकाव्यम्, दिल्लीस्थ-संस्कृतप्रतिभा-पत्रिकाप्रकाशितम्)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१४। गीताञ्जलिः, (रवीन्द्रनाथकृतमा गीताञ्जलिकाव्यस्य संस्कृतानुवादः, विश्वभारतीग्रन्थविभागेन प्रकाशितः)।

१५। मन्दाक्रान्तावृत्तम्, (खण्डकाव्यम् संस्कृतसाहित्यपरिषदा प्रकाशितम्)।

दर्शनग्रन्थाः—

१६। जातिबाधकविचारः, (न्यायशास्त्रीयग्रन्थः, परिषत्पत्रिकायामंशेन प्रकाशितः)

१७। न्यायपरिभाषा, (बङ्गभाषामयो न्यायशास्त्रीयग्रन्थः, कलिकाता-राष्ट्रियसंस्कृतमहाविद्यालयेन प्रकाश्यमानः)

१८। प्रवचनत्रयी, (काशीसंस्कृतविश्वविद्यालये प्रचारिता न्याय-वैशेषिकदर्शनीया वक्तृतामाला, तत्रत्य-सारस्वतीसुषमापत्रिकायां प्रकाशिता)

१९। मुक्तिदीपिका, (गदाधरकृत-मुक्तिवादस्य टीका बङ्गभाषामय-तात्पर्य्यविवरणसहिता सं-साः-पः-प्रकाशिता)

२०। मुक्तिलक्ष्मीः, (हरिरामकृतमुक्तिवादविचारस्य टीका, कलिकाता-राष्ट्रियसंस्कृतमहाविद्यालयेन प्रकाशिता।)

२१। रत्नलक्ष्मीः, (कणादतर्कवागीशकृत-भाषारत्नग्रन्थस्य टीका, सं-साः-पः-प्रकाशिता)।

२२। भाष्यप्रभा, (सांख्यकारिकाया गौड़पादभाष्यक्य पादटीका, छात्रपुस्तकालयेन प्रकाशिता)।

२३। सारप्रभा। (सांख्यसारटीका, छात्रपुस्तकालयेन प्रकाशिता)।

२४। सारदीपिका, (सारमञ्जरी-टीका, छात्रपुस्तकालयेन प्रकाशिता)।

२५। सुप्रभा, (मः मः महेशन्यायरत्नकृत-'नव्यन्यायभाषाप्रदीप' ग्रन्थस्य स्वकृत-परिशिष्टसहिता बङ्गभाषामयविवृतिः, कलिकाता-राष्ट्रिय संस्कृत महाविद्यालयेन प्रकाशिता)।

२६। सूक्तिदीपिका, (जगदीशकृतायाः प्रशस्तपादभाष्यसूक्तेः टीका बङ्गभाषामय भाष्यतात्पर्य्यसहिता सं-साः-पः-प्रकाशिता। इत्यादिः।

Devavani Parishad New Delhi